This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं. द. १२

२८७

ऐतरेयभाष्यसटीक

Acc. No.: ~~५८१~~ M1055
Title: ~~ऐतरेयोपनिषद्भाष्य~~
Subject: ~~वेदांत~~
Author: ~~शंकराचार्य~~
Date: A.D. 1678
~~पत्रे~~: (40)

KKSU LIBRARY RAMTEK 441 106 M1055 Dist. Nagpur

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः। आत्मा वा इदमुत्तरग्रंथेन ब्रह्मविद्यैवोच्यत इति परिशेषितमुत्तरमनुवदति• परिसमाप्त
मिति• यच्चेयावच्च कर्मजातमपरब्रह्मविज्ञानं च स्मृत्यंतरेषुक्तं तत्सर्वमत्र नोक्तमित्यत आह• सैषेति• फल
तत्क्रमित्यर्थः• इदानीं पूर्वपक्षं दर्शयति। एतत्सत्यमिति• ननु एको देवः सर्वभूतेषु गूढ इत्युच्यमानं सर्वब्र
ॐ परिसमाप्तं कर्मसहापरब्रह्मविषयविज्ञानेन। सैषा कर्मणो ज्ञानसहितस्य परा गतिरुक्ता विज्ञा
नद्वारेणोपसंहृता• एतस्य [illegible] यं ब्रह्म प्राणाख्यमेष एको देवं एतस्यैव प्राणस्य सर्वे देवा वि
भूतय एतस्य प्राणस्यात्मभावं गच्छन् देवता अप्येतीत्युक्तं• सोयं देवताप्ययलक्षणः परः पुरुषार्थ एव मोक्षः।
ह्येत्यत आह एष एको देव इति कथमग्न्यादिषु सर्वस्वरूपत्वमत आह एतस्यैवेति। ननु निरतिशयपुरुषार्थोय
विद्यांतरेण भवितव्यमत आह सोयमिति। ननु मोक्षः पुरुषार्थ इत्यत आह एष मोक्ष इति॥

१

ननु देवताप्ययो मोक्षोस्तु तथापि तत्साधनं ब्रह्मज्ञानं वक्तुमुत्तरग्रंथ आरंभणीय इत्यत आह। सचेति। इ
दानीं सिद्धांतत्वेनोत्तराध्यायद्वयमवतारयति। तानिति शिष्यः पृच्छति कथं पुनरिति। परिशेषादित्युत्तरमा
ह। अन्यार्थेति। प्राणस्य संसारित्वेन निंदितत्वाच्चेत्याह तथा चेति अशनायादिमतोप्यसंसारित्वमस्त्वत आह।
सचायं चथोक्तेन ज्ञानकर्मसाधनेन प्राप्तव्यो नातः परमस्तीति ये केचित् प्रतिपन्नाः तान्निराचिकीर्षुरुत्तरं केव
लात्मविद्याविधानार्थमात्मा वा इदमित्याद्याह• कथं• पुनरकर्मसंबंधिकेवलात्मविज्ञानविधानार्थमुत्तरो ग्रंथ इ
ति गम्यते। अन्यार्थानवगमात्• तथा च पूर्वोक्तानां देवतानामग्न्यादीनां संसारित्वं दर्शयिष्यति। अशनायादि
दोषवत्त्वेन तमशनापिपासाभ्यामन्ववार्जदित्यादिना। अशनायादिमत्सर्वं संसार एव। परस्य तु ब्रह्मणो अ
शनायाद्यत्ययश्रुतेः नवसेव केवलात्मविज्ञानं मोक्षसाधनं ननु कर्मैवाधिक्रियते विशेषाश्रवणात्
अशनेति। परमात्मा ह्यशनायादिमानित्यत आह परस्य त्विति। प्राणस्याशनायादिमत्वश्रवणात् तज्ज्ञानस्याशनायादिमत्संसार
निवर्तकत्वाभावात् परस्याशनायाद्यत्ययश्रुतेस्तज्ज्ञानादशनायादिमत्संसारनिवृत्तिर्भवति• अतः केवलात्मज्ञानं मोक्ष
साधनमित्युक्तं तत्र प्राणात्मवादी चोदयति नेचिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि प्राणात्मविज्ञानयोर्भेदस्तर्ह्यधिकारिभेदेन भाव्यं। नचसोस्ति विशेषाश्रवणात्. अतः कर्म संपत्तु प्राणविज्ञानं त.
देवास्मा वा इत्यादिना उच्यते। अतः कर्मसमुच्चितप्राणविज्ञानं मुक्तिसाधनमित्यन्ति प्रायः। विशेषाश्रवणादितिहेतु
विवृणोति। कर्मण इति। इहास्यामुपनिषदीत्यर्थः। यद्यपि नाश्रम्यंतरस्येह श्रवणं तथापि श्रुत्यंतरे परीक्ष्यत्वो

कर्मिण आश्रम्यंतरस्येहाश्रवणात् कर्मेच गृहस्थीसहस्वलक्षणप्रस्तुत्यानंतरमे
वात्मज्ञानं प्रारभ्यते। तस्मात्कर्म्येवाधिक्रियते॥

कान् कर्मचितान् ब्राह्मणो निर्वेदमायादितिश्रवणादधिकारिभेद इतिचेत्तत्राह। कर्मचेति। विमतप्राणवि॰ज्ञा
नं मुक्तिसाधनं कर्मसंबंधित्वात् संमतवत् प्रकरणभेदोपिनास्यत्र। अतः श्रुत्यंतरानुसारेणाधिकारिभे
दोनकल्पनीयः। नच श्रुत्योर्विरोधः। उदितानुदितहोमवद्व्यवस्थाकरणात्। एतदनुसारेण वा श्रु
त्यंतरे विज्ञानस्तुतिपरत्वेनाधिकारिभेदे श्रवणं नेतव्यमित्यर्थः॥ २

ननु यद्यपि कर्मसंबंध्येवात्मविज्ञानं तथापि प्राणात्मविज्ञानाद्भिन्नमेवास्तु यथा कर्मप्राणज्ञानयोरेकमुक्ति
साधनत्वेपि भेदस्तद्वत्। यथाग्नेयादीनामेकस्वर्गसाधकत्वेपि भेदस्तद्वत्त्राह। नचेति। अयमर्थः। कर्मसं
दी बंधित्वादिति त्वया कर्मसंबंध्यात्मज्ञानाद्भिन्नत्वमात्रं साध्यते। अतः परिशेषात् प्राणात्मज्ञानादभिन्नत्वं

नच कर्मासंबंध्यात्मज्ञानं पूर्ववदंते उपसंहारात्। यथा च कर्मसंबंधिनः पुरुषस्य सूर्यात्मनः स्थावरजं
गमादि सर्वप्राण्यात्मत्वमुक्तं मित्रेण च सूर्य आत्मेत्यादिना। तथैव एष ब्रह्मैष इंद्र इत्याद्युपक्रम्य सर्वप्राण्या
त्मत्वं यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रमित्युपसंहरिष्यति। तथा च संहितोपनिषत्। एतं ह्येव बह्वृचा महत्युक्थे कृ
इत्यादिना। कर्मसंबंधित्वमुक्त्वा एतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत इत्युपसंहरिष्यति॥

भविष्यति। अतो नैकांतिक इति कर्मसंबंधित्वादिति पूर्वोक्तहेतुत्वानुवादः। पूर्वोक्तज्ञानयोरसर्वात्मविषयत्वेन
प्रभिन्नज्ञानात्वेतयोरेकत्वं कर्मसंबंधित्वाच्चेति संग्रहवाक्यं विवृणोति। यथेति। कर्मसंबंध्येवेत्याह। तथा 3
चेति। प्रज्ञात्मत्वेनापि प्रसिद्धिरित्याह॥ श्रीरामजयरामजयजयराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रज्ञात्मत्वेनापि प्रत्यभिज्ञामाह। तयेति। उपसंहरति। तस्मादिति। ज्ञानैवे पुनरुक्तिप्रसंग इति शंकते। पुनरुक्त्येति। व
तथा तस्यैव योयमशरीरः प्रज्ञात्मेत्युक्तस्य यश्चासावादित्ये एकमेतदिति विद्यादित्येकत्वमुक्तं तथेहापि कोय
मात्मेत्युपक्रम्य प्रज्ञात्मत्वमेव प्रज्ञानं ब्रह्मेति दर्शयिष्यति। तस्मान्नाकर्मसंबंधात्मज्ञानं पुनरुक्त्यानर्थक्य
मिति चेत्प्राणो वा अहमस्म्यृष इत्यादि ब्राह्मणेन सूर्ये आत्मेति च निर्धारितस्यात्मनः आत्मा वा इदमित्यादि ब्राह्म
णेन कोयमात्मेति प्रश्नपूर्वकं पुनर्निर्द्धारणं पुनरुक्तमनर्थकमिति चेत् न तस्यैव धर्मांतरविशेषनिर्द्धारणा
र्थत्वान्न पुनरुक्तदोषः। कथं तस्यैव कर्मसंबंधिनो जगत्सृष्टिस्थितिसंहारादिधर्मविशेषनिर्धारणार्थत्वा
त्केवलोपास्यार्थत्वाद्वा आत्मेत्यादिः परतो ग्रंथसंदर्भः आत्मनः कर्मिणः कर्मणोन्यत्रोपासनाप्राप्तौ कर्म
प्रस्तावे विहितत्वात्केवलोप्यात्मोपास्य इत्येवमर्थो भेदाभेदौ मा स्यतामित्येक एवात्मा कर्मविषये भेददृष्टि
नाक्स एवा कर्मकाले ऽभेदेनाप्युपास्य इत्येवमप्यपुनरुक्तता।
स्तु संग्रहवाक्यं विवृणोति। प्राणो वा इति धर्मिणो भेदाभावेपि धर्मभेदाद्भेद इति पुनरुक्तिं परिहरति नेति। ए
न तत्प्रश्नपूर्वकं विवृणोति। एक एवेति॥ श्रीरामचंद्राय गुरवे नमः॥ २

श्रुत्यंतरानुसारेणापि समुच्चयं साधयति। विद्यां चाविद्यां चेति न च वर्षशतादित्यादिस्पष्टार्थः। ज्ञानमात्रेणैव ब्राह्मणत्वि
मिश्रेणवाजायत इति कर्मपाश्रुतिरथ भिक्षाचर्यं चरंतीत्यादिश्रुतिविरुद्धेत्याशंक्याह तत्रेति अंधपंग्वादिविषयावेतिग ति
विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति च कुर्वन्नेवेह कर्मा
णि जिजीविषेच्छतं समा इति वा जिनां न च वर्षशतात्परमायुर्मर्त्यानां येन कर्मपरित्यागेनात्मानमुपासी
त। दर्शितं च। तावंति पुरुषायुषोन्हां सहस्राणि भवंतीति। वर्षशतं चायुः कर्मणे वन्या दर्शितं पन्नः कुर्व
न्नेवेह कर्माणीत्यादि तथा यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्याद्याश्च तं
यज्ञपात्रैर्दहंतीति च ऋणत्रयश्रुतेश्च। तत्र पारिव्रज्यादिशास्त्रं व्युत्थायाथ भिक्षाचर्यं चरंतीत्यात्मज्ञान
स्तुतिपरो र्थवादोनधिकृतार्थो वा। न परमात्मज्ञानेफलादर्शनेक्रियानुपपत्तेः
त्यंतरमाह अनधिकृतार्थो वेति इदानीं समुच्चयनिराकरणद्वारेणात्मनः प्राणविवेकं सिद्धांती साधयति।
परमात्मविज्ञानेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेव विवृणोति। यदुक्तमिति। अयमर्थः। आप्तकाममात्मकाममिति श्रुतेरतिशयाधानलक्षणः संस्कारो न भव
वति कर्मणि ब्रह्मणि सपर्यगात् शुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति श्रुतेर्दोषनिरासार्थोऽपि न
संभवति तस्माद्ब्रह्माहमस्मीति पश्यतः न प्राप्तं तेन कर्मणा कर्त्तव्येन ज्ञानोत्तरकालमनुष्ठेयेन प्रयोजनमस्ति ततः
यदुक्तं कर्मिणः एवात्मज्ञानं कर्मसंबंधित्वादिति तन्न। परं त्वात्मकामं सर्वसंसारदोषधर्मवर्जितं
ब्रह्माहमस्मीत्यात्मत्वेन विज्ञाते कृते न कर्त्तव्येन वा प्रयोजनमात्मनः पश्यतः फलादर्शने क्रियानोपप
(?) द्यते फलादर्शनेऽपि नियुक्तत्वात् क्रियते इति चेन्न नियोगाविषयात्मदर्शनात् इष्टयोगमनिष्टवियोगं चात्मनः
प्रयोजनं पश्यंस्तदुपायार्थी यो भवति स नियोगस्य विषयो दृष्टो लोके न तु तद्विपरीतो नियोगाविषय
ब्रह्मात्मत्वदर्शी।
फलाभावात् क्रियानोपपद्यते। तस्मात्कर्मसंबंधित्वादिति हेतुः श्रुत्या कालात्ययापदिष्टः। आत्मप्राप्तिलक्षणामु
क्तिः। कर्मसाध्या न भवति नित्यत्वादाकाशवदिति अनुमानविरुद्धश्च फलाभावेऽपि विहितत्वात् कर्त्तव्यमिति शंकते।
फलादर्शनेऽपीति। नियोज्याभावे विधिरेव न संभवतीति परिहरति। नेति। हेतुमाह। नियोगेति। संग्रहवाक्यं विवृणोति। इ ४
ष्टयोगमिति॥ श्रीराम॥

काम्य तत्प्रभवत्वात्

विपक्षे दंडमाह। ब्रह्मात्मेति। न केवलं फलाभावान्नियोगाभावः स्वामित्वाभावादप्याह। न चेति। आम्नायप्रतिनस्वामित्व
मिति नाशंकनीयमित्याह। आम्नायस्यापीति। ततः किमत आह। नहीति। सर्वज्ञत्वात् स न नियोज्य इत्याह। नापीति। आ
म्नायस्य नित्यत्वात् स्वतः प्रमाणत्वाच्च भृत्यवदविवेकित्वं चासिद्धमिति शंकते। आम्नायस्येति। नियतत्वमंगीकृत्य परि
ब्रह्मात्मत्वदर्श्यपि चेन्नियुज्येत। नियोगाविषयोऽपि स न्यायः कश्चिन्नियुक्त इति सर्वं कर्म सर्वेण सदा कर्त्तव्यं प्रा
प्नोतीति न चानिष्टं। न च स नियोक्तुः शक्यते केन चित्। आम्नायस्यापि तत्प्रभवत्वात्। न हि स्वविज्ञानोत्थेन वचसा पि० २
स्वयं नियुज्यते। नापि बहुवित्स्वाम्यविवेकिना भृत्येन। आम्नायस्य नित्यत्वे सति स्वातंत्र्यात्सर्वान्प्रतिनि
योक्तृत्वसामर्थ्यमिति चेन्नोक्तदोषः। तथापि सर्वेण सर्वदाऽविशिष्टं कर्म कर्त्तव्यमित्युक्तो दोषोऽपरिहा
र्य एव। तदपि शास्त्रेणैव विधीयत इति चेन्न यथा कर्म कर्त्तव्यता शास्त्रेणोक्ता तथा तद्व्याप्त्यात्मज्ञानं तस्यैव क
र्मिणः शास्त्रेणैव विधीयत इति चेत् न। विरुद्धार्थबोधानुपपत्तेः॥
हरति। नोक्तेति। एतदेव विवृणोति। तथापीति। यस्य कर्मविधिस्तस्य विज्ञानं श्रुत्या विधीयते किं कर्मणः। तस्माद्युत्या ⑧
बोध्यत इति नोदयति। तदपीति। एतद्विवृणोति। यथेति। सागरं तरेदितिवद्विरुद्धोऽर्थः शास्त्रेण न विधातुं शक्यत इ
ति। परिहरति नेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्विवृणोति। नहीति। श्रुत्यंतरवदिहाप्यर्थसिद्धः संन्यासवदित्यर्थः। स्नातस्तसंबंधित्वं पुण्यपापसंबंधित्वं न केवलं बोध
यत्येव शास्त्रं। किं तर्हि। इमां क्रियां भावयेदिति प्रेरयतीत्यपि कोहरतीनसंभवतीत्याह। न-चेति। हेतुव्यतिरेकमुखेनो
पपादयति। शास्त्रकृतमिति। सैवविधेयेत्याशंक्याह। यद्धीति। आत्मज्ञानविरुद्धः कर्मविधिर्न संभवतीत्युक्तं। एवं चस्यात्मज्ञा
नस्यैकस्य स्नातस्तत्संबंधित्वं तद्विपरीतत्वं च बोधयितुं शक्यं। शीतोष्णत्वमिवाग्नेः न-चेष्टयोगचिकीर्षास्मिनो
निष्टवियोगचिकीर्षा-च शास्त्रकृता सर्वप्राणिनां तद्दर्शनात्। शास्त्रकृतं-चेत्तदुभयं गोपालादीनां न दृश्येता
शास्त्रज्ञत्वात्तेषां। यद्धि स्वतः प्राप्तं तच्छास्त्रेण बोधयितव्यं-तच्चेत्कृतकर्त्तव्यताविरोध्यात्मज्ञानं शास्त्रेणाद
त्तं कथं तद्विरुद्धां कर्त्तव्यतां पुनरुत्पादयेच्छीततामिवाग्नौ तमइव च भानौ। न बोधयत्येवेति चेत्। न सम
नं १ आत्मेति विद्यादिज्ञानं ब्रह्मेति चोपसंहारादसौमेवेत्तत्त्वमसीत्येवमादिवाक्यानां तत्परत्वात्॥ नं १
नशास्त्रमन्यदंगीकृतं चेत्कर्म न संभवतीत्याह। तस्येदिति। ननु नात्स्येवात्मज्ञानं शास्त्रकृतं तस्यानुत्पत्तिलक्षणाप्रामाण्यादि ५
ति-चोदयति। न बोधयत्येवेति। तदनुपपन्नमिति। अपौरुषेयत्वात्प्रमाण-तेषु तत्प्रतिपादकवाक्येषु स्थितिसाह। सिद्धांती
नसमइति। तर्हि तात्पर्याभावल्लक्षणमप्रामाण्यमित्याशंक्याह। तदात्मानमिति

तर्हि विपरीतलक्षणाप्रामाण्यमित्याशंक्याह। उत्पन्नस्य-चेदिति। यस्मात्तत्तत्शास्त्रं प्रमाणं तस्माद्विरोधात् प्रमाणाभावा
त्कर्मत्याग एव कर्त्तव्य इति दृष्टव्यं। तत्र विरोधोजनकादेरिवाकर्त्तृबुध्या कर्मानुष्ठानेन परिहर्त्तव्य इत्यभिप्रेत्य प्रयोज
नाभाव इतरत्रापि तुल्य इति शंकते। त्यागेपीति। संग्रहवाक्यं विवृणोति। नाकृतेनेति। नैव तस्य कृतेनार्थो नाकृतेनेहकश्चनेति
उत्पन्नस्य चब्रह्मात्मविज्ञानस्याबाध्यमानत्वान्नानुत्पन्नं भ्रांतं वेति शक्यं वक्तुं। त्यागेपि प्रयोजनाभावस्य तुल्यत्व
मिति-चेन्नाकृतेनेहकश्चनेति स्मृतेर्यआहुर्विदित्वा ब्रह्म व्युत्थानमेव कुर्यादिति तेषां मध्येषत्समानो दोषः प्रयोजनाभा
व इति चेन्न क्रियामात्रत्वाद्व्युत्थानस्य। अविद्यानिमित्तो हि प्रयोजनस्य भावो न वस्तुधर्मः सर्वप्राणिनां तद्दर्शनात्। प्रयो
जनतृष्णया-च प्रेर्यमाणस्य वाङ्मनःकायैः प्रवृत्तिर्दर्शनात्॥
गीता। परिहरति। नाक्रियामात्रत्वादिति। ननु यावज्जीवादिश्रुतिचोदितत्वात् कर्मणां तत्परित्यागो विधिं विना नोपपद्य
ते विधिश्चेष्टसाधनात्मके प्रयोजनमंतरेण नोपपद्यते तथा च कथमक्रियामात्रमित्याशंक्य निरस्यंश्च संग्रहवाक्यं विवृणो
ति। अविद्येति अयमर्थः। न तु शास्त्रप्रापितकर्मानुष्ठानं। किं तर्हि विद्याप्रापितं। तत्त्वात्मनो न स्वतएव निवृत्तानर्थत्वात्
प्राप्तसर्वार्थत्वाच्चान्वयव्यतिरेकाभ्यां च सिद्धमिति॥ (६)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मैवेदमग्र आसीत् सोकामयत जाया मे स्यादथ प्रजायेयेति । तस्य धनं च मे स्यादथ कर्म कुर्वीयेति । स इति । अक्रियामात्रं विदुषः स्वाभा
विकमितिनानुष्ठेयमित्याह । तत्र्वेति । अत्र दृष्टांतो न हीति । यदि यागस्यार्थप्राप्तत्वान्न प्रयोजनं तर्हि गृहस्थस्यापि विदुषस्तत्रैवा
वस्थानमस्त्वित्याह । व्युत्थानं तर्हीति । तत्रावस्थानस्य नियमो वा नियमो वेति विकल्प्य दूषयति । नेति । नियमो व्युत्थानमेवे
सोकामयत जाया मे स्यादित्यादि पुत्रवित्तादि पांक्तलक्षणं काम्यमेवेत्युत्थेयेति साध्यसाधनलक्षणेषणे एवेति
वाजसनेयिब्राह्मणेऽवधारणात् विद्याकामदोषनिमित्तायाः वाऽन्येनः कायप्रवृत्तो पांक्तलक्षणायाः विदुषो
ऽविद्यादिदोषानुपपत्तेः क्रियाभावमात्रं व्युत्थानं न तु यागादिवदनुष्ठेयरूपं भावात्मकं । तत्र विद्यावत्पुरुष
धर्म इति न प्रयोजनम् । ... न हितमसि प्रवृत्तस्योदिते आलोके पदार्थावलोकनाय प्रयतनं तर्हि
प्रयोजनमिति प्रश्नार्हं । व्युत्थानं तर्ह्यर्थप्राप्तत्वान्न चोदनार्थमिति । गार्हस्थ्ये चेत् परब्रह्मविज्ञानं जातं तत्रैवास्य
कुर्वत आसनं न ततोन्यत्र गमनमिति चेन्न । कामप्रयुक्तत्वाद् गार्हस्थ्यस्येतावान्वै काम इत्युक्त्वा ह्येते एषणे एवेत्य
वधारणात् । कामनिमित्तपुत्रवित्तादिसंबंधाभावमात्रं । न हि ततोन्यत्र गमनं व्युत्थानमुच्यते । अतो न गार्ह
स्थ्य एवाकुर्वत आसनमुत्पन्नविद्यस्येतेन गुरुशुश्रूषा तपसोरप्यप्रति विदुषः सिद्धा ॥
तीष्टसिद्धिरित्याह । एतावानित्यादिना । ब्रह्मचारिवानप्रस्थयोरपि विदुषोः संन्यास एव कर्तव्य इत्याह । एतेनेति ॥

पांत्रे

६

अत्रेति चोद्यो नरेस्यष्टे । चातुर्वर्ण्यं चरेद्भैक्ष्यमभिशस्तपतितवर्ज्यं । यतीनां चतुर्गुणमित्यादि नियमो न यथाकामप्रयुक्त एवं नियतकर्मनियम
इति चोद्यांशमाचष्टे । शरीरेति । विदुषो नियोगाविषयत्वे श्रुतेरप्रामाण्यमिति चोदयति । यावज्जीवादीति । परिहरति । नेति । परोक्तदृष्टांतं विघटयति ।
अत्र केचिद्गृहस्थाभेक्ष्यात्परिव्राजकत्रस्यमानोः सूक्ष्मदृष्टितां दर्शयंतः उत्तरमाहुः । भिक्षोरपि भिक्षाटनादिनियमदर्शनाद्
देहधारणमात्रार्थिनो गृहस्थस्यापि साध्यसाधनोभेयविनिर्मुक्तस्य देहमात्रधारणार्थमशनाच्छादनमात्रमुपजीवतो गृ
ह एवास्या सनमिति । न । स्वगृहविशेषपरिग्रहनियमस्य कामप्रयुक्तत्वादित्युक्तोत्तरमेतत् । स्वगृहविशेषपरिग्रहाभावे च शरीरधा
रणमात्रप्रयुक्ताशनार्थिनः स्वपरिग्रहविशेषाभावेऽर्थाद्भिक्षुकत्वमेव । शरीरधारणार्थायां भिक्षाटनादिषु प्रवृत्तौ यथानियमो
भिक्षोः शौचादौ तथा गृहिणोपि विदुषः कामिनोऽस्तु नित्यकर्मसु नियमेन प्रवृत्तिर्यावज्जीवादि श्रुतिनियुक्तत्वात्प्रत्यवायपरिहारायेत्ये
तन्नियोगाविषयत्वेन प्रत्युक्तमशक्यनियोज्यत्वाच्चेति । यावज्जीवादिनित्यचोदनानर्थक्यमिति चेन्न । अविद्वद्विषयत्वेनार्थवत्त्वात्
यत्तु भिक्षोः शरीरधारणमात्रप्रवृत्तस्य प्रवृत्तेर्नियंतृत्वं तत्प्रवृत्तेर्न प्रयोजकं आचमनप्रवृत्तस्यापि पिपासापगमत्वेनान्य
प्रयोजनार्थत्वमवगम्यते । न चाग्निहोत्रादीनां तद्वदर्थप्राप्तप्रवृत्तिनियतत्वोपपत्तिः ।

पर

यच्चेति । अयमर्थः । भिक्षाटनादिकमावश्यकं न भवति । किं तर्हि अर्थप्राप्तस्य नियममात्रं अग्निहोत्रादिकं नवावश्यकमिति
विषमो दृष्टांत इति ॥ श्रीराम ॥

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवत्वेवं नवत्वोवैषम्यं तथाप्यर्थप्राप्तोनुपपन्न इति चोदयति। अर्थेति। अविद्यावस्थायां सिद्धस्य नियमस्याविद्यावस्थायां साग
करणं नास्तीति परिहरति। नेति। तथाप्यविदुषः संन्यासो न संभवतीत्याशंक्याह। अर्थं प्राप्तस्येति। पुनर्वचनमेव दर्शयति।
पि अर्थप्राप्तप्रवृत्ति नियमो प्रयोजनान्तरावेनुपपन्न एवेति चेन्न। तन्नियमस्य पूर्वप्रसिद्धत्वात्तदतिक्रमे पत्नगौर
४२ वादर्प्राप्तस्य व्युत्थानस्य च पुनर्वचनाद्धि विदुषो मुमुक्षोः कर्तव्यत्वोपपत्तिः अविदुषापि मुमुक्षुणा पारिव्राज्यं
व कर्तव्यमेवं तथा च शान्तो दान्त इत्यादिवचनं। शमादीनां चात्मदर्शनसाधनानामन्याश्रमेष्वनुपपत्तेरत्याश्रमिभ्यः परमं प
वित्रं प्रोवाच सम्यगृषिसंघजुष्टमिति च श्वेताश्वतरे विज्ञायते नकर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु
रिति च ज्ञात्वा नैष्कर्म्यमाचरेदिति च स्मृतेः। ब्रह्माश्रमपदे वसेदिति च स्मृतेः। ब्रह्मचर्यादिविद्यासाधनानां च साकल्ये
न गार्हस्थ्ये संभवतः न चासंपन्नसाधनं कस्यचिदर्थस्य साधनायाळं -
तथा चेति। इदं वचनम्म संन्यासिविषयमिति नाशंकनीयमित्याह। शमेति। अस्मिन् वाक्ये श्रूयमाणमात्मज्ञानं तावत्संन्यासि
न इति श्रुत्यंतरेण स्मृत्या च साधयति। अत्याश्रमिभ्य इति। शमादीनां चान्यत्रासंभवात्तद्विषयत्वं साधयति। ब्रह्मचर्येति॥

॥ ७॥

प्राग्विज्ञानसमुच्चितानां कर्मणां देवत्ताअप्येति य एवं वेदेति श्रुतफलं तादेवतां ताए तादेवताः सृष्टा इति संसारफलत्वेन श्रवणात् मुमु
क्षुणा त्याग एव कर्तव्य इत्याह। यद्विज्ञानेति। प्राणात्मज्ञानसमुच्चयस्य मुक्तिसाधनत्वे प्राणहीनमंगं तद्गुणज्ञानं वा तत्फलं तदित्यन्यथा
यद्विज्ञानयोगी निवर्गार्ह स्वाश्रमकर्माणि तेषां फलमुपसंहृतं देवताप्ययलक्षणं संसारविषयमेव। यदि क
र्मिण एव परमात्मज्ञानममृतत्वं विष्यत्संसारविषयस्यैव फलस्योपसंहारो नोपपत्स्यत। अंगफलं तदिति चेन्न। त
द्विरोध्यात्मवस्तुविषयत्वादात्मविद्यायाः। निराकृतसर्वनामरूपकर्मपरमार्थात्मवस्तुविज्ञानममृतत्वसाध
नं गुणफलसंबंधे हि निराकृतसर्वविशेषात्मफलविषयत्वेन प्राप्नोतितत्त्वानि एकं यत्र त्वस्य सर्वमात्मैवाभूदि
त्यधिकृतस्य क्रियाकारकफलादिसर्वव्यवहारनिराकरणाद्विदुषस्तद्विपरीतस्याविदुषो यत्र हि द्वैतमिव स्या
क्रियाकारकफलरूपस्यैव संसारस्य दर्शितत्वाच्चेवाजसनेयिब्राह्मणे। तथेहापि देवताप्ययसंसारविष
यं यत्फलमशनायादिमद्वस्त्वात्मकं तत्फलमुपसंहृत्य केवलसर्वात्मकवस्तुविषयं ज्ञानममृतत्वाय वक्ष्यामीति
प्रवर्त्तते॥
सिद्धिं द्योदयति। अंगफलमिति नेति। परिहरति। तत्प्रपंचयति- निराकृतेति। नकेवलं श्रुत्यंतरमेवात्र प्रमाणमियमपीत्याह तथेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जायमानश्रुतेरविरक्तविषयत्वान्न विरोध इत्याह। ऋणेति। एतदेव विवृणोति। मनुष्येति संहितारण्यकवाक्यमाह• तयेति। कौषीतकीनां
चैवाक्यं प्रमाणमित्याह। एतद्ध स्म वा इति। यद्यविद्वद्विषय ऋणप्रतिबंधस्तर्हि तदनपाकरणसंन्यासो नोपपद्यत इति चोदयति।

ऋणप्रतिबंधश्चाविदुष एव मनुष्यपितृदेवलोकप्राप्तिं प्रति यत्नो न विदुषः सोयं मनुष्यलोकः पुत्रेणैवेत्यादि लोकत्रय तथा
साधननियमश्रुतेः विदुषश्च ऋणप्रतिबंधाभावो दर्शितः। आत्मलोकार्थिनः किं प्रजया करिष्याम इत्यादिना• एतद्ध स्म
वैतद्विद्वांस आहुः ऋषयः कावषेया इत्यादि। एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहुवांचक्रुरिति च कौषीतकीनां•
अविदुषस्तु ऋणानपाकरणे पारिव्राज्यानुपपत्तिरिति चे[illegible]न्न• प्राग्गार्हस्थ्यप्रतिपत्तेः। ऋणित्वा
संभवादधिकारानारूढो ह्यृणी चेत्स्यात्सर्वस्य ऋणित्वमित्यनिष्टं प्रसज्येत। प्रतिपन्नगार्हस्थ्यस्यापि गृहा
द्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वनाद्वेत्यात्मदर्शनोपायसाधनत्वेनेष्यत एव पारि
व्राज्यं यावज्जीवश्रुतीनामविद्वन्मुमुक्षुविषयेत्वतार्थता ॥

अविदुष इति। ऋणित्वप्राप्तेः प्राक् संन्यासः संभवतीति परिहरति। प्रागिति। तथाप्यविदुषो गृहस्थस्य न संन्यास
इत्याशंक्याह। प्रतिपन्नेति। कर्माधिकाराभावे यावज्जीवश्रुतीनामप्रामाण्यप्रसंगो, विद्वद्विषयत्वेन तासां परिहृतः। ॥८॥
इदानीमविदुषां कर्माभावेपि न तत्प्रसंगं मुमुक्षुविषयत्वेन परिहरति• यावदिति

इतश्च तद्विरोधो नास्तीत्याह। छांदोग्ये चेति। पारिव्राज्यश्रुतीनां गत्यंतरासंभवे नित्यकर्मविधीनामन्यथात्वकल्पनमयु
क्तमित्याशंक्याह। यत्त्विति। अधिकारिणामेवाश्रमविकल्पसमुच्चयस्मृतेश्चानांधादिविषयत्वं संन्यासस्येत्याह• सर्वेति।
एवमविद्वद्विषये संन्यासं प्रसाध्य पुनरपि विद्वत्संन्यासाभावे परेषामभिप्रेतं हेतुमनुवदति। यच्चेति। तन्निरस्यति• तदसदिति

छांदोग्ये च केषांचिद्विदा दशरात्रमग्निहोत्रं हुत्वा तत ऊर्ध्वं परित्यागः श्रूयते• यत्तु नधिकृतानां पारिव्राज्यमिति
तन्न। तेषां पृथगेवोत्सन्नाग्निरनग्निको वेत्यादिश्रवणात्सर्वे स्मृतिषु चाप्रसिद्धः समुच्चयश्च। यत्तु विदुषोऽर्थप्राप्तं
व्युत्थानमिति अशास्त्रार्थत्वे गृहे वने वा तिष्ठतो न विशेष इति• तदसत्। व्युत्थानस्यैवार्थप्राप्तत्वान्नान्यत्राव
स्थाने। स्यादन्यत्रावस्थानस्य कामकर्मप्रयुक्तत्वं ह्यवोचाम• तदभावमात्रं च व्युत्थानमिति। यथाकामित्वं तु
विदुषोऽत्यंतमप्राप्तमत्यंतमूढविषयत्वेनावगमात्• तथा च शास्त्रचोदितमपि कर्म आत्मविदो प्राप्तं गुरुभा
रत यावगम्यते• किमुतात्यंताविवेकनिमित्तं यथाकामित्वं ॥

(७)

अर्थप्राप्तिरपि संन्यासस्य नाश्रमांतरस्येत्यर्थः। अन्यत्रावस्थाननियमे च दोष उक्त इत्याह। अन्यत्रेति। अनियमे सिद्धा
सिद्धिरप्युक्तेत्याह। तदभावेति। यदि विदुषो नियमनाभावस्तर्हि भक्ष्याभक्षणाद्यपि स्यात्। इति तेषां मतं निरस्यति• यथेति• किं
पुनर्न्यायेन यथेष्टचेष्टां निरस्यति। शास्त्रेति॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तं द्रष्टं तेन साधयति। नहीति। नन्वमुपसंहृतं • तस्मादिति। परोक्तं समुच्चयप्रमाणमनूद्य निरस्यति • यत्त्विति कर्मसमुच्चयोऽयमित्यर्थः। वि
द्याविद्ययोर्विरोधे श्रुतिप्रमाणमाह। दूरमेत इति। इदानीमविरोधेन तां श्रुतिं व्याचष्टे • तपइति। पुनरपि परोक्तं दूषयति • यत्त्विति
नह्युन्मादतिमिरदृष्ट्युपलब्धं वस्तु तदपगमे पि तथैव स्यादुन्मादतिमिरदृष्टिनिमित्तत्वादेव तस्य। तस्मादात्मविदो व्युत्थान
व्यतिरेकेण न यथाकामित्वं न चान्यत्कर्त्तव्यमित्येतत्सिद्धं। यत्तु विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति न विद्यावतोऽविद्या
पि सह वर्त्तत इत्यर्थः। कस्तर्हि एकस्मिन्पुरुषे एकेन सह संबध्येयातामित्यर्थः यथा शुक्तिकायां रजतं शुक्तिकाज्ञाने एकस्य
पुरुषस्य। दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञातेति काठके तस्मान्न विद्यायां सत्यामविद्यायाः संभवोऽस्ति ते
पसा ब्रह्म विजिज्ञासस्वेत्यादि श्रुतेः तप आदि विद्योत्पत्तिसाधनं गुरूपसदनादि च कर्म अविद्यात्मकत्वादविद्योच्य
ते तेन विद्यामुत्पाद्य मृत्युं काममतितरति। ततो निष्कामस्य त्यक्तैषणो ब्रह्मविद्यया मृतत्वमश्नुत इत्येतमर्थं दर्शयन्नाह
विद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति यत्तु पुरुषायुः सर्वं कर्मणैव व्याप्तं • कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं स
मा इति। अविद्वद्विषयत्वेन परिहृतमितरथासंभवात्। यत्तु वक्ष्यमाणमपि पूर्वोक्तेन तुल्यत्वात्कर्मणाविरुद्धमात्मज्ञानमिति
तत्सविशेषनिर्विशेषात्मतया प्रत्युक्तमुत्तरव्याख्याने च दर्शयिष्यामो अतः केवलनिष्क्रियब्रह्मात्मैकत्वविद्याप्रदर्शनार्थमुत्त ॥९॥
रो ग्रंथ आरभ्यते

विचारफलमुपसंहरन् श्रुतिव्याख्यानं प्रारभते- आत्मेति • आप्लृ व्याप्ताविति धातोः निष्पन्न आत्मशब्द इत्युक्तं अततीत्यात्मा सातत्यगमन इत्यस्य वा रूपं •
अततेरत्तेर्वेति। देशाद्यासक्तिं व्यावर्तयति पर इति • मीमांसकात्मनो भेदमाह • सर्वशक्तिरिति • तर्हि सर्वसंबंधात्संसारित्वमत आहाश
नायादिसर्वसंसारधर्मवर्जितो नित्य

आत्मा आप्नोतेरत्तेरततेर्वा परः सर्वज्ञः सर्वशक्तिरशनायादिसर्वसंसारधर्मवर्जितो नित्य
शुद्धबुद्धमुक्तस्वभावोऽजोऽजरोऽमृतोऽभयो वै इदं यदुक्तं नामरूपकर्मभेदभिन्नं जगदात्मैवैकोऽग्रे

ॐ आत्मा वा इदमेक एवाग्र आसीत्

ग्रे जगतः सृष्टेः प्रागासीत् •

नेति • कुत इत्यत आह नित्येति • फलकारकक्रियाशक्तयो व्यावर्त्तन्ते अथवा नित्यः स्थूलप्रपंचव्यतिरिक्तः शुद्धः सूक्ष्मप्रपंचव्यतिरिक्तः
सर्वसंबंधरहितः कार्यकारणसंघातरहितं जन्मादिषड्भावरहितत्वं अद्वैतत्वं च श्रुत्युक्तमित्याहाज इति॥ (10)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष ब्रह्मैष इंद्र इत्यादि स्थितिकालेपि जगत आत्मत्वं वक्ष्यत स्तद्विरुद्धमग्र आत्मेदमासीदिति विशेषणमिति पृच्छति सामानाधिक
रण्येन तस्य सनंतरं व्याकृतनामरूप [illegible] भेदत्वाद्भेदे सिद्धे आत्मनामांतर व्यावृत्त्यर्थं नैक एवेति विशेषणद्वयेन शंकस्येत त्रोद्यंपरि

किं नेदानीं स एवैको न कथं तर्ह्यासीदिरुच्यते यद्यपीदानीं स एवैकस्तथाप्यस्ति विशेषः प्रागुत्पत्तेरव्याकृतनाम
रूपभेदत्वादनेकशब्दप्रत्ययगोचरमात्मैकशब्दप्रत्ययगोचरं [illegible] विशेषः यथा सलिलं
पृथक् फेननामरूपव्याकरणात् प्राक् सलिलैकशब्दप्रत्ययगोचरमेव फेनं। यदा सलिलात्पृथक् पृथक् नाम
रूपभेदेन व्याकृतं भवति तदा सलिलं फेनं चेत्यनेकशब्दप्रत्यय प्राक् सलिलमेवेति चैकशब्दप्रत्ययमाक्
फेनं भवति तद्वत्॰

मात्मैकशब्दप्रत्ययगोचरं जगदिदानीं नामरूपभेद २

हतमित्याह सिद्धांतीनेति॰ एकस्यैव कथमवस्थाभेदेनैकशब्दप्रत्ययगोचरत्वं चेत्यत्र दृष्टांतमाह। यथेति॥ ॥१०॥
किं

एक एवेत्यनयोर्व्यावर्त्यं नान्यत्किंचनेति॰ तयोः स्पष्टीकरणमिषदिति॰ तदितरविलक्षणमित्याह। इतरद्वेति एवं तस्मै किंकदृष्टांते

नान्यत् किंचन न किंचिदपि मिषन्निमिषद्व्यापारवदितरद्वा॰ यथा सांख्यानामनात्मपक्षपातिस्व
तंत्रं प्रधानं॰ यथा च काणादादीनामणवो न तथान्यदिहास्ति नः किंचिदपि वस्तु विद्यते किं तर्ह्यात्मै

नान्यत्किंचनमिषत्॰ स ईक्षत

वैक आसीत् इत्यभिप्रायः॰ स सर्वज्ञस्वाभाव्यादात्मा एकः सन्नीक्षत। ननु प्रागुत्पत्तेरकार
णत्वात् कथमीक्षितवान् नायं दोषः सर्वज्ञस्वाभाव्यात्। तथा च मंत्रवर्ण अपाणिपादो जवनो ग्र
हीतेत्यादिः॥

नात्मैकत्वं सिद्धं चेत्किमर्थं विशेषणद्वयमित्याशंक्य यदि कल्पितपरमार्थभेदनिरासार्थमित्याह॰। यथेति आत्मशब्दोपि प्रधानवाची॰
कथं तद्व्यावृत्तिरत आह॰ स सर्वज्ञ इति। इदं चोद्यं तेनैव निराकृतमित्याह॰ नायं दोष इति॰ सर्वज्ञत्वभावेन ईक्षणे कर्तृत्वं करणत्वेन
त्यत्र प्रमाणमाह॰ तथा चेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वीश्वरस्य संकल्पव्यतिरेकेण सर्गव्यापारो नास्तीत्याशंक्य : सत्यं । नास्त्येव तथापि लोकानुसरणार्थं तथोच्यत इत्याह । यथेति ।
यदि लोकानुसरणं क्रियते तर्हि तद्वदुपादानकारणेन भवितव्यमिति चोदयति नन्विति । यदि । नामरूपे स्तस्तर्हि कथं तदज्ञावोक्ति
रत आह । अव्याकृत इति

केनापि प्रायेणोत्याह । लोकानन्नः प्रकृतीन् प्राणिकर्मफलोपभोगस्थानभूतानन्नुसृजे ।
सृजेहं । इत्येवमीक्षित्वा लोव्यस आत्मेमांल्लोकानसृजतस्रष्टवान् । यथेह बुद्धिमांस्तक्षादिरेवं
लोकान्नुसृजा इति स इमांल्लोकानसृजत् ।

प्रकारान्नुसृज्य प्रासादादीन् सृजा इतीक्षित्वा दृष्ट्वा नंतरं प्रासादादीन् सृजति । तद्वत् । ई
त्रीः ननु सोपादानस्तक्षादिः प्रासादादीन् सृजतीति युक्तं निरुपादानस्त्वात्मा कथं लोकान्सृज
तीति नैष दोषः सलिलफेनस्थानीये आत्मभूते नामरूपे अव्याकृते आत्मैकशब्दवाच्ये व्याकृते फे
नस्थानीयस्य जगत उपादानभूते संभवतः तस्माद्भूतनामरूपोपादानः स सर्वज्ञो जगन्निर्मिमी
त इत्यविरुद्धं ॥

तर्हि सृष्टेः पूर्वं नरकालं किमनात्मभूतेनेत्याह आत्मैक इति । परिणामपक्षमाश्रित्य परिहार उक्तः ॥ ॥११॥

इदानीं विवर्तवादमाश्रित्याह अथवेति । विज्ञानवानिति । मायाकाल उक्तः । निरुपादान इति । मायाव्यतिरिक्तोपादानरहि
त इत्यर्थः । सर्वशक्तित्वे सम च्छिद्रूपम हामायाया आश्रयत्वहेतुमाह । महामाय इति आत्मा स्वमायाद्वारेण जगद्रूपेण विवर्
तत इत्यस्मिन्पक्षे आत्मनः सद्रूपत्वात्पूर्वक्षणोपमर्दनादुत्तरक्षणोत्पत्तिरिति । सौत्रांतिकादीनां पक्ष असदेव प्रागुत्पत्तेः

अथवा विज्ञानवान्मायावी निरुपादान आत्मानमेवात्मांतरत्वेन आकाशे गन्धर्वनगरमिव निर्मिमीते ॥
तथा सर्वज्ञो देवः सर्वशक्तिर्महामाय आत्मानमेवात्मांतरत्वेन जगद्रूपत्वेन निर्मिमीत इति युक्ततरमेवं च सति कार्यकारणोभयासद्वादपक्षाश्च न प्रसज्यंते सुनिराकृताश्च भवंति ॥

कार्यमिति काणादमीमांसकादिपक्षः । उभयमप्यसदिति माध्यमिकपक्षस्तेन प्रसज्यंत इत्याह । एवं च सतीति । श्रुतिविरुद्ध
त्वात्सुनिराकृताश्च भवंतीत्याह । सुनिरिति ॥ (12)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यप्यत्र लोकसृष्टिरेवोच्यते तथाप्यात्मन आकाशः संभूत इत्यादिश्रुत्यंतरेण पंचभूतसृष्टिर्द्रष्टव्येत्याह· आकाशा

कान्नु लोकानसृजतेत्याह॥ अंभो मरीचीर्मरमाप इति आकाशादिक्रमेणांडमुत्पाद्यांभःप्रभृतीन्लोकानसृजत·
तत्रांभःप्रभृतीन्स्वयमेव व्याचष्टे श्रुतिः अदस्तदंभःशब्दवाच्यो लोकः परेण दिवं द्युलोकात्परेणापरस्तात्तस्यां
अंभो मरीचीर्मरमापोऽदोंभः परेण दिवं द्यौः प्रतिष्ठांतरिक्षं मरीचयः।

भःशब्दवाच्यव्याप्यांतभरणाद्यौः प्रतिष्ठा आश्रयस्तस्यां स लोकस्य द्युलोकादधस्तादंतरिक्षं यत्तन्मरी
चयः एकोप्यनेकस्थानभेदाद्बहुवचनभाक् मरीचय इति

दिति· अप्द्विर्व्याप्यलोकस्याभरणादंभःशब्दवाच्यत्वमित्याह· लोकेति· एकमेवांतरिक्षं कथं बहुवचनेनोच्यते तत्राह· एको
पीति॥ ॥१२॥

गस्यंतरमाह· मरीचिभिरिति·॥ सर्वेषां प्राणिनां कर्माणि फलानि च सर्वप्राणिकर्मफलानि तेषामुपादानं स्वीकारस्तस्याधि
ष्ठानभूतानीति समासविवरणं॥ ज्ञानमेव तत्पदस्य प्रमाणमाह· यस्येति·॥
मरीचिभिर्वा सरश्मिभिः संबंधात्पृथिवी मरः म्रियंतेऽस्मिन्भूतानीति मरः या अधस्तात्पृथि
व्या आपस्तच्यंत आप्नोते लोकाः यद्यपि पंचभूतात्मकत्वं लोकानां अपां बाहुल्यादंभआमभिरेवांभो
मरीचीर्मरमाप इत्युच्यते सर्वप्राणिकर्मफलोपादानाधिष्ठानभूतांश्चतुरो लोकान्सृष्ट्वा स ईश्वरः पु
नरेवेक्षते इमे नु अंभःप्रभृतयो मया सृष्टा लोकाः परिपालयितृवर्जिता विनश्येयुः तस्मादेषां रक्ष
पृथिवी मरो या अधस्तात्ता आपः स ईक्षतेमे नु लोका लोकपालां
न्नु सृजा इति सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् तमभ्यतपत्॥
णार्थं लोकपालान् लोकानां पालयितॄन्सृजै सृजेऽहमित्येवमीक्षित्वा सोऽद्भ्य एव अप्प्रधानेभ्य एवं पंच
भूतेभ्यो येभ्योंऽभःप्रभृतीन्सृष्टवांस्तेभ्य एवेत्यर्थः पुरुषं पुरुषाकारं शिरःपाण्यादिमंतं समुद्धृत्यादद्भ्यः
समुपादाय मृत्पिंडमिव कुलालः पृथिव्या अमूर्छयत् मूर्छितवान् संपीडितवान् स्वावयवसंयोजनेनेत्यर्थः। (13)
तं पिंडं पुरुषविधमुद्दिश्याभ्यतपत् अभिध्यानं संकल्पं कृतवानित्यर्थः यस्य ज्ञानमयं तप इति श्रुतेः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातस्य पुत्रस्य जनने तन्मुखादि निर्भेदनं न युक्तं नाग्नौ प्रसंगादिति नाग्नीकनीयंतस्य रक्षणार्थत्वादि दृष्टी तेन दर्शयति। यथेति। पर्यायाणामा
तस्याभितप्तस्येश्वरस्य संकल्पेन तपसाऽभितप्तस्य मुखं निरभिद्यत मुखाकारं सुषिरमाजायत यथा पक्षिणोऽण्डं
भिद्यते एवं तस्मात् भिन्नात् मुखाद्वाक्करणमिंद्रियं निरवर्त्तत तदधिष्ठाताग्निस्ततो वाचो लोकपालस्तथा
तस्माभितप्तस्य मुखं निरभिद्यत यथांडं मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्रा
णः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां
श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत
हृदयान्मनो मनसश्चंद्रमा नाभिर्निरभिद्यत
... नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरिति सर्वत्राधिष्ठानं करणं देवतावत्त्रयं क्रमेण निर्भि
न्नमिति। अक्षिणी कर्णौ त्वक् हृदयं अंतःकरणाधिष्ठानं मनोंतःकरणं॥

॥१२॥

द्विग्रहणं करोति। अक्षिणीत्यादिना॥

पर्यायांतरेषु देवतानां संकीर्त्तनान्मृत्युशब्देनापि मरमुच्यत इत्याह। यथेति। प्रकरणाद्रेतःशब्देनापींद्रियमेवोच्यत इत्याह। इंद्रियं रेत इति इ
दानीं ब्रह्मैकत्वविद्यैव निःश्रेयससाधनमिति दर्शयितुं ब्रवीति। महदर्णव इति। तत्रार्णवसाम्यं संसारार्णवस्य दर्शयति अवि
नाभिः सर्वप्राणबंधनस्थानं तस्मादपान इति पाय्विंद्रियमुच्यते तस्याधिष्ठात्री देवता मृत्युश्चान्यत्र। तथा
शिश्नं निरभिद्यत प्रजननेंद्रियस्थानं इंद्रियं रेतो विसर्गार्थत्वात्सह रेतसा परेचयन् रेतस आपइति॥ ता एता
आग्न्याद्या देवता लोकपालत्वेन संकल्प्य सृष्टा ईश्वरेणास्मिन्संसारार्णवे संसारसमुद्रे महति अविद्या
नाभ्या अपानोपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस
आपः॥१॥ ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे॥
कामकर्मप्रभवदुःखोदके तीव्ररोगजरामृत्युमहाग्राहेनादावनंतेऽपारे निरावलंबे विषयेंद्रियजनितसुख
लवक्षणविश्रामे॥
द्येति। दुःखोदकतयासमुद्रस्वरूपेण साम्यं। ग्राहकत्वाद्रोगादीनां ग्राहसाम्यं लौकिकसमुद्रस्य नदीकूपाद्यपेक्षया नादि
त्वमनंतत्वमपारत्वं च संसारसमुद्रस्यापि ब्रह्मविद्याभावेऽनंतत्वं अपारत्वं निरालंबनत्वं चास्ति दुःखनिवृत्तिर्विश्रामः॥ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

पंचेंद्रियार्थेन तृष्णाप्रेरकत्वान्मारुतेन समग्रवाहरूपत्वान्मार्तंडत्व-श्चानर्था नाम त्रिर्भिः सा पीसाधनत्वाशास्यो पितसार्म्यतं दुल्ला
पंचेंद्रियार्थतृष्णारतविक्षोभोच्छितानर्थशतमहोर्मिमालेम हापातकग्राहघनेकृतनिरय हालहेसादिकजि
तोऽशनो ऽतमहारवे सर्व्याज्वदानदयाऽहिं साशमदमाद्यपात्मगुणपाथेयेपूर्ण ज्ञानोदये सर्व योग
सर्वसागमार्गेमोक्षतीरे। एतस्मिन्महार्णवे प्रापतन्नपतितवंसः तस्मादग्न्यादिदेवता अप्ययलक्षणो

प्रापतंतमशना पिपासाभ्याम च वार्जत ॥

पियागतिर्व्याख्यातोऽज्ञानकर्म समुच्चयानुष्ठानफलभूता सापि नालं संसार दुःखोपशमाये सर्यविव
क्षितोर्थो त्र। यत एवं तस्मादेवं विदित्वा परंब्रह्मात्मात्मनः सर्वभूतानांचयोवक्ष्यमाणविशेषणः प्राकृतश्च
जगदुत्पत्तिस्थितिसंहारहेतुत्वेन सर्वसंसारदुःखोपशमनाय वेदितव्यः तस्मादेषपंथाएतत्कर्मैतद्ब्र
ह्मैतत्सत्यं यदेतत्परं ब्रह्मात्मज्ञानं नान्यः पंथाविद्यतेऽयनायेतिमंत्रवर्णात् तं संस्थानकरणं देवतोत्पत्ति
बीजभूतं पुरुषं प्रथमोत्पादितं पिंडं आसानमशनापिपासाभ्यामन्चवार्जत् अनुगमितवान् संयोजितवानित्यर्थः ॥ ॥१४॥

दिर्कपाथेयस्य संयोगादिषुद्वारेण ज्ञानोत्पत्तिस्थितेश्च तस्य मार्गसाम्ये ॥ किमर्थं संसारनिंदा क्रियते तत्राह यत इति ॥ श्रीराम

एतमर्थमभिप्रेत्यएष पंथा इत्याद्याराध्यमित्याह तस्येति। ईश्वरज्ञानस्यैव करणत्वात्करणमेवोच्यते प्रजानीहि। विघ्नत्वे
तस्य कारणभूतस्याशनायादिदोषवत्त्वात्कार्यभूतानामपिदेवतानामशनायादिमत्त्वं तास्ततोऽशनायापिपासा
भ्यां पीड्यमानाः एतं पितामहं स्रष्टारमब्रुवन्नुक्तवत्य आयतनं नोऽस्मभ्यं प्रजानीहि विधत्स्व यस्मिन्नायतने प्रतिष्ठि
ताः समर्थाः सत्योऽन्नमदाम भक्षयाम इति। एवमुक्त ईश्वरस्ताभ्यो देवताभ्यो गां गवाकृतिपिंडं ताभ्य

ताएनमब्रुवं नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति ॥
ताभ्योगामानयत्ता अब्रुवन्न वैनोयमलमिति ताभ्योश्वमानयत्ता अब्रु
वन्नवैनोयमलमिति ॥ ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं वतेति पुरुषो वावसुकृतं ॥

एवाकृतिः पूर्ववत्पिंडं समुद्धृत्य मूर्छयित्वाऽनयद्दर्शितवान् ताः पुनर्गवाकृतिं दृष्ट्वाऽब्रुवन् नूनं वै नो वाऽस्मदर्थं अधिष्ठायो
न्नमत्तुं मलमयं पिंडोऽलं नवै अलं पर्याप्तो अत्तुं न योग्य इत्यर्थः। गवि प्रत्याख्याते तेभ्य अश्वमानयत्ता अब्रुवन्न वैनोय
मलमिति पूर्ववत् ॥ सर्वप्रत्याख्याने ताभ्यः पुरुषमानयत्स्वयोनिभूतं ताः स्वयोनिं पुरुषं दृष्ट्वाऽखिन्नाः सुकृतं
शोभनं कृतमिदमधिष्ठानं बतेत्यब्रुवन् तस्मात्पुरुषो वाव पुरुष एव सुकृतं सर्वपुण्यकर्महेतुत्वात् स्वयं वा स्वेनै
वासना स्वमायाभिः कृतत्वात्सुकृतमुच्यते ॥
ते। गवांश्वस्तनादिपरिज्ञानाभावात्कर्माधिकारानाभावाच्च अधिष्ठेयं नात्तुमलमित्यर्थः ॥

15

दि१

बलाधिष्ठातादयो दंडनायकादयः। आदिग्रहणं करोतिवा पुरियॉना- भावरूपत्वाद्रस्य धर्मत्वादित्यर्थः।
तादेवताईश्वरोब्रवीदिएमास्वामिदमधिष्ठानमितिमत्वा सर्वैहिस्वयां निष्ठुरमंते। तोयथायतनं यस्ययद्देदनादिक्रिया
योग्यमायतनं तत्प्रविशतेति तथास्तित्सनुतांप्रतिलभ्येश्वरस्यनगर्यामिव बलाधिष्ठातादयो ग्रामादयो ग्निर्वागग्निमानिनी
वागेवभूत्वास्वयोनिंमुखंप्राविशत्। तथोक्तार्थमन्यत्। वायुर्नासिके आदित्योऽक्षिणीदिशः कर्णौ ओषधिवनस्पतयस्त्व
चं चंद्रमाहृदयं मृत्युर्नाभिं आपः शिश्नं प्रविशन्निवेत्ले बधाधिष्ठानासु देवतासु निरोधिष्ठाने स सशनापिपासेन मी
श्वरमब्रूतामुक्तवयावाभ्यामधिष्ठानमधिचिंतयविधत्स्वेत्यर्थः। स ईश्वर एवमुक्तस्ते अशनापिपासे अब्रवीत्
नहियुवयोर्भावरूपत्वाच्चेतनावदस्त्यनाश्रित्यान्नात्तृत्वंसंभवति। तस्मादेतास्वेवाग्न्याद्यासु वांयुवांदेवतास्वध्यात्मो
दिदेवतासु आभजामि। वृत्तिसंविभागेनानुगृह्णामि एतासु भागिन्यौ यद्देवत्यो यो भागो हविरादिलक्षणः स्यात्तस्यैते

ता अब्रवीद्यथायतनं प्रविशतेति सोऽग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भू
त्वाक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो
भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशंस्तमशनापिपासे अब्रूता
मावाभ्यामभिप्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति तस्माद्यस्यै
कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥२॥

नैव भागिन्यौ भागवत्यौ वां करोमीति सृष्ट्यादावीश्वर एवं व्यदधात् यस्मात्तस्मादिदानीमपि यस्यै कस्यै च देवतायै देवतायाः अर्थाय हविर्गृ॥१५॥
ह्यते चरुपुरोडाशादिलक्षणं भागिन्यावेव भागवत्यावेवास्यां देवतायामशनापिपासे भवतः ॥२॥

यद्देवतानामयंस्रष्टा परमेश्वरः यथा राज्ञः करदास्तादृक्कथं नस्येश्वरत्वं एवं हि इति ननु विराडासेश्वरः किमिसन्नमास्ये
स एवमीश्वरः ईक्षितवान् कथमिमे लोकाः लोकपालाश्च मया सृष्टा अशनायापिपासाभ्यां च संयोजिताः
अतो नैषां स्थितिरन्नमंतरेण तस्मादन्नमेभ्यो लोकपालेभ्यः सृजै इत्येवं हि लोके ईश्वराणामनुग्रहे निग्रहे च (ग)
स्वातंत्र्यं दृष्टं स्वेषु तद्वन्ममहेश्वरस्यापि सर्वेश्वरत्वात्सर्वान्प्रति निग्रहानुग्रहे स्वातंत्र्यमेव स ईश्वरोऽन्नं सिसृ
क्षुस्ता एव पूर्वोक्ता अपतेद्दिश्याभ्य तपत्ताभ्यो भितप्ताभ्य उपादानभूतेभ्यो मूर्तिर्घनरूपं धारणसमर्थं
चराचरलक्षणामजायतोत्पन्ना अन्नं चैतन्मूर्तिरूपं या वै सा मूर्तिरजायत तदेतदन्नं लोकलोकपालानां

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो
मूर्तिरजायत या वै सा मूर्तिरजायतान्नं वै तत्तदेनत्सृष्टं पराङ् त्यजिघांसत्तद्वाचाजिघृक्षत्तन्ना
शक्नोद्वाचा ग्रहीतुं।

र्थ्यभिमुखोत्सृष्टं तद्यथा मूषकादिर्मार्जारगोचरे सत् ममभक्षुर न्वाद इति मत्वा परागंचतीति पराङ् सत्तद
न्नमतीत्य जिघांसद् इति गंतुमैच्छत् लायितुं प्रारभत इत्यर्थः। तस्यान्नाभिप्रायं मत्वा स लोकपालो लोकपालयत्
कार्यकारणलक्षणः पिंडः प्रथमजत्वाद् न्यांश्चान्नादानपश्यंस्तदन्नं वाचा वदनद्वारेणाजिघृक्षत् ग्रहीतुमैच्छत् .स्य२ 18
तदन्नं नाशक्नोन्न समर्थोऽभवत् वाचा वदनक्रियया गृहीतुमुपादातुं।
ननजिघृक्षातत्राह प्रथमजत्वादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु देवताभिः प्रार्थितोऽन्नं स्रष्टवान्। तत्रान्नं तान् जीवान् दृष्ट्वा जिघांसत्। तथा सति कथमन्येषामन्नादानां भावः। नैष दोषः
ता २ देवैरुद्दिश्यान्नं सृष्टमित्येतावताभिः। कथमित्येतावता देवताभिः प्रार्थितं इति लोकवदुच्यते ननु चराचरात्मकस्य जगतः स
द्वैनन्तरत्वं सप्रथमजः शरीरीयं र्वा ग्रहैष्यत्। गृहीतवान् स्यात्। सर्वो लोकस्तत्कार्यभूतत्वादन्नमभिव्याहृत्यैवात्र
स्यत् तृप्तो भविष्यत्। न त्वेतदस्ति तो नाशक्नोद्वाचा ग्रहीतुमित्यवगच्छामः। पूर्ववतोऽपि समानमुत्तरं। तत्प्राणेन
त चक्षुषा न श्रोत्रेण न त्वचा न मनसा तेन तेन करणव्यापारेणान्नं ग्रहीतुमशक्नुवन् पश्चादपानेन वायुना मुख
छिद्रेण तदन्नमभिजिघृक्षत्

स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुं स
यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषा ग्रहीतुं स यद्धै
नच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स यद्धैनच्छ्रो
त्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचा ग्रहीतुं स यद्धैनत्त्वचाग्रहैष्यत्स्पृ
ष्ट्वा हैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसा ग्रहीतुं स यद्धैनन्मनसाग्रहैष्यद्ध्यात्वा हैवा
न्नमत्रप्स्यत्

गीप्रागेव देवताः संतीति दर्शयति। प्रथमेति। पर्यायाणामादिग्रहणं करोति। तत्प्राणेनेति॥ ९६

पाणिंद्रियं व्यावर्त्तयति। अपानेति। कथं चिदं मदृते स्यादित्यनंतरं यद्यपि कतरेण प्रपद्या इति पवृत्तेन तथाप्यर्थक्रमेण यदि वाचेत्यादिव्या
तदावयत्तदन्नमेव जग्राह। अशितवांस्तेन। स एषोऽपानवायुरन्नस्य ग्रहोऽन्नग्रह इत्येतत्। यद्वायुर्यो वायुरन्नायुरन्नबंधनोऽन्नजीव
यो नो वै प्रसिद्धः स एष वायुः स एवं लोकपालसंघातस्थितिमन्ननिमित्तां कृत्वा पुरपौरतत्पालयितृत्स्थितिं सत्स्वामीव सईक्षत कथं
नु केन प्रकारेणेति वितर्कितेयं नु इदं मदृते मामंतरेण [illegible] पुरस्वामिनं यदिदं कार्यकारणसंघातकार्यं वक्ष्यमाणं कथं नु खलु माम
तरेण स्यात्। परार्थं स यदि वाचाभिव्याहृतमित्यादि केवलमेव वाग्विहरणादितं निरर्थकं न कथंचन भवेत्। बलिस्तुत्यादीव
पौरवंद्यादिभिः प्रयुज्यमानं स्वाम्यर्थं स्यात् स्वामिनमंतरेण स स्यैव स्वामिनिवेदत्। तस्मान्मया परेण स्वामिनाधिष्ठातृगं त्रारू
ताद्यतफलसाक्षिणा तेन भवितव्यं पुरस्येव राज्ञा। यदि नामैतत्संहतकार्यस्य परार्थत्वं परार्थिनं चेतनमंतरेण भवेत् पुरपौरकी
तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन ग्रहीतुं स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत्तदपानेना
जिघृक्षत्तदावयत्सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत क
तरेण प्रपद्या इति स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि
त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति (17)
८
र्यमिव तत्स्वामिनं। अथ कोऽहं किंरूपः कस्य वा स्वामी॥
वष्टे यदीति किंरूप इति किमपि रूपमस्य न विद्यते ऽसन्निस्यर्थः। वागादिस्वामित्वरूप इत्याशंक्याह। कस्यवेति। तथा वागादयः स्वामिनो न भवेयुरित्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्युक्तमर्थं प्रपंचयति। यच्चाहमिति। कथं चेदं नामरूपमधिगंतव्यमित्याकांक्षायां संहतस्य परार्थत्वानुमानादित्याह यदर्थमिति। इदानीं कतरेणेति
वाक्यमाचष्टे एवमिति। बहिः प्रक्षिप्तस्य तैलस्यांतस्तद्रसास्वादादनुमीयते द्वारमित्याह। मूर्धानं तिन्ददेतन्नांदनमिति विशेषनिर्देशे हेतुमाह इतराणीति
यद्यहं कार्यकारणसंघातमनुप्रविश्य वागाद्यभिव्याहृतादिफलं नोपलभेयं राजेव पुरमाविश्याधिष्ठातृपुरुषवत् तावता वेक्षणं
न कश्चिन्मामयं सन्नेवंरूपश्चेत्याधिगच्छेत् द्विवारये द्विपर्ययरूपो यं वागाद्यभिव्याहृतादीदमिति वेदस्य संवेदनरूपश्चा
धिगंतव्योहं स्यां यदर्थमिदं संहतानां वागादीनामभिव्याहृतादि। यथा स्तंभकुड्यादीनां प्रासादादिसंहतानां स्वावयवैरसंहतपरा
र्थत्वं तद्वदिति। एवमीक्षित्वा ततः कतरेण प्रपद्य इति मूर्धा चास्य संघातस्य प्रवेशमार्गो चनयोः कतरेण मार्गेणेदं कार्यकरणसंघा
तलक्षणं पुरं प्रपद्ये प्रपद्येयं इत्येवमीक्षित्वा न तावन्मद्भृत्यस्य प्राणस्य ममसर्वार्थाधिकृतस्य प्रवेशमार्गेण प्रपदाभ्यामधः प्रपद्ये।
किं तर्हि पारिशेष्यादस्य मूर्धानं विदार्य प्रपद्येयेति। लोक इवेक्षितकारी स स्रष्टा ईश्वरः प्राणेश्वरः एतमेव मूर्धसीमानं विदार्य व्यि
दं कृत्वा एतया द्वारा मार्गेणेदं कार्यकारणसंघातं प्रापद्यत प्रविवेश इयं हि प्रसिद्धा द्वाः मूर्ध्नि तैलादिधारणकाले तद्रसादिसं

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत सैषा विदृतिर्नाम द्वाः

वेदनात्सैषा विदृतिर्विदारितत्वाद्विदृतिर्नाम प्रसिद्धा द्वाः इतराणि तु श्रोत्रादिद्वाराणि भृत्यादिस्थानीयसाधारणमार्गा १७
त्वान्न समृद्धिनंदनहेतूनीदं द्वारं परमेश्वरस्यैव केवलस्येति॥

ति
वक्ष्यमाणायेचेति पुरुषे ह्वाइत्यादिनेति अयमावसथ इत्यनंतरं स जात इति वाक्यद्वयं नाष्यकारैर्न व्याख्यातं तत्र किं कारणमिति न विद्मः। तस्या
यमर्थो ऽस्माभिः क्रतः संप्रदर्श्यते। स जात इति सीमांतं विदार्य यः प्रविष्टः स भूतान्युद्दिश्य अभिव्यैख्यदालोचनं कृतवान्। इह कार्यकरण
तदेतं नांदनं नंदनमेव नांदनमिति दैर्घ्यं छांदसं नंदयत्यनेन द्वारेण गत्वास्मिन् ब्रह्मणीति। तस्यैवं स्रष्ट्याप्रविष्टस्य
स्वं जीवेनात्मना राज्ञेव पुरे त्रय आवसथा जागरितकाले इंद्रियस्थानं दक्षिणं चक्षुः स्वप्नकाले ऽतर्मनः सुषुप्तिकाले इ
दं हृदयाकाशमित्येते वक्ष्यमाणा वा त्रय आवसथाः पितृशरीरं मातृगर्भाशयः स्वं च शरीरमिति त्रयः स्वप्नाः जाग्रत्स्व
प्नसुषुप्त्याख्याः। ननु जागरितं प्रबोधरूपत्वान्न स्वप्नः। मैवं। स्वप्न एव। कथं परमार्थस्वात्मप्रबोधाभावात् स्वप्नव
दसद्वस्तुदर्शनाच्च। अयमावसथश्चक्षुर्मनसोंतरं द्वितीयो हृदयाकाशस्तृतीयोयमावसथ इत्युक्तानुकीर्तनमेव

तदेतन्नांदनं तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथो ऽयमावसथो
ऽयमावसथ इति स जातो भूतान्यभिव्यैख्यत्किमिहान्यं वावदिषदिति।

तेषु ह्ययमावसथेषु पर्यायेणात्मभावेन वर्तमानो ऽविद्यया दीर्घकालं गाढं प्रसुप्तः स्वाभाविक्यान प्रबुध्यते। अनेक
शतसहस्रानर्थजसंनिपातजदुःखमुद्गराभिघातानुभवैरपि [illegible]
संघाते मत्तो ब्रह्मणो ऽन्यं वा वदिषत् किं वदितुमैच्छत् किं न्वैच्छदित्यर्थः। किमित्यनयोरेकस्य लिंगव्यत्ययेन वा सामानाधिकरण्येन पु
नर्वचनस्याभिप्रायः। तेषु त्रयमिति प्रसिद्धेः सुषुप्तेर्विशेषमाह दीर्घकालमिति। इतर सुषुप्तेः श्रमादिकं निमित्तमस्ति अस्यां 18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंनिमित्तमित्यत आह स्वाभाविकेति। कथमस्यानेकदुःखानुभवैर्वैराग्यादिद्वारेण विवेको न जायत इत्यत आह ॰ गाढमिति। यद्य
पि विवेकनिमित्तदुःखानुभवोस्ति वेदांतश्रवणं च तथापि निसकर्मानुष्ठानजनितायाः सहस्तुद्वैरभावादित्यर्थः। सायदा न जायते
तदात्मज्ञानं जायत इत्याह। सकदाचिदिति तद्भ्याचार्यादेव विद्याविदिता साधिष्ठानं प्रापदिति श्रुतेराचार्योपदेशात् जायत इत्याह।

सकदाचित्परमकारुणिकेनाचार्येणात्मज्ञानप्रबोधकच्छ कार्यायां वेदांतमहाभेर्यां तत्कर्णमूले ताड्यमा

स एतमेव पुरुषं ब्रह्म ततममपश्यत्। म१

नार्यां एतमेव सत्प्याद्दिकर्तृत्वेन प्रकृतं पुरुषं पुरिशयनाद्यसाने ब्रह्मबृहत्तं अंतःकरणेकेनलिप्तेन ततं
त२ व्याप्तमं परिपूर्णमाकाशवत्प्रबुध्य तापश्यत्

आचार्येणेति। शुश्रूषादिनासम्यगावर्जितेन कृतार्थेनैवतेनापीत्याह। परमेति। तेनापि वेदांतवाक्येनैवोपदेशः कर्त्तव्य इत्याह।
वेदांतेति तस्य च तत्परत्वात्प्रामाण्यं लक्ष्यविशेषे स्तिप्रमाणांतरादित्याह। भेर्यामिति। रहस्योपदेशः कर्त्तव्य इत्याह। कर्णमूलेइति।
तस्याऽसकृच्छ्रवणमपेक्षितमित्याह। ताड्यति। वेदांतेष्वपि एवमेवेयादिवाक्यमेव साक्षात् ज्ञानं जनयतीत्याह। आत्मज्ञानेति।
सप्तम्यंतं पदं पुरुषब्रह्मेति पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः पदार्थान्योंप्रत्यक्ब्रह्मणोर्लक्ष्यलक्षणा १८
संबंधः॥ श्रीरामचंद्राय नमः॥ ॥

इदंद्रयाक्यं पुराकल्परूपविधोपर्वपस्यति तस्मादिदमेवमहावाक्यमिति केषांचिन्मतं अस्माकं तु प्रज्ञानं ब्रह्मेसेवमहावाक्यं इदंद्रक्
ब्रह्मैव जीवरूपेण प्रविष्टमिति· एकत्वसंभवनामात्र परमिति पूर्वोत्तरग्रंथयोः संसारस्यैव प्रतिपादनात्। उत्तरत्र तन्निराकरणपूर्वकं

इदं ब्रह्ममात्मनः स्वरूपं अदर्शी दृष्टवान् अस्मि अहो इति विचारणापूर्वं यस्मादिदमेवयसाक्षादपरोक्षा
ब्रह्मसर्वांतरमपश्यन् अपरोक्षेण तस्मादिदंपश्यतीदंद्रो नाम परमात्मा तस्मादिदंद्रो हवै नाम प्रसिद्धो लोके ईश्वर

इदमदर्शमिती ३ तस्मादिदंद्रो नामेदंद्रो हवै नाम तमिदंद्रं संतमिंद्र इत्या
चक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः॥ ३॥

त्मेवमिदंद्रं संतमिंद्र इति परोक्षाभिधानेनाचक्षते ब्रह्मविदः संव्यवहारार्थं पूज्यतमत्वात् प्रत्यक्षनामग्रह
णभयात्। तथाहि। परोक्षप्रियाः परोक्षनामग्रहणप्रिया इव एव हि यस्मात् देवाः किमुत सर्वदेवानामपि देवो
महेश्वरो द्विर्वचनं प्रकृताध्यायपरिसमाप्त्यर्थं॥ ऐतरेयोपनिषदि शांकरभाष्ये चतुर्थोऽध्यायः॥ ४॥

मेकत्वोपदेशात् इत्यैतरेयभाष्यटिप्पणे चतुर्थोऽध्यायः॥ ४॥ श्रीरामचंद्रार्पणमस्तु॥ श्रीराम जयराम जय जय राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्द३

प्रविष्टस्यजीवस्यसंसारप्रकारमुत्तरोत्तरं वर्ण्यत इति संबंधं वक्तुं वृत्तमनुवदति अस्मिन्निति। वाक्यार्थ इति प्रतिपाद्य इत्यर्थः।
किमर्थं संसारो वर्ण्यत इत्याकांक्षायां सर्वस्य संसारस्याविद्यात्मकत्वं वक्तुमिति चोद्यमुखेन दर्शयन्सर्वं संसारमनुवदति। ज
स २ गदिति। जगदुत्पत्तिकर्तृत्वं ईमान्लोकानसृजतेत्युक्तं आत्मा वा इत्यनेन प्रलयकर्तृत्वमुक्तं तत एतावेतावित्यादिना स्थितिहे
(अस्मिंश्चतुर्थाध्याये एष वाक्यार्थो जगदुत्पत्तिस्थितिलयहेतुः संसारी सर्वज्ञः सर्ववित्सर्वमिदं जगत्तोन्य स्प १
द्वस्त्वंतरमनुपादाय वाकाशादिक्रमेण सृष्ट्वा स्वात्मप्रबोधार्थं सर्वाणि च प्राणादिमच्छरीराणि स्वयं प्रवि
वेश प्रविश्य च स्वमात्मानं यथाभूतमिदं ब्रह्मास्मीति साक्षात्प्रत्यबुध्यत। तस्मात्सर्वशरीरेष्वेक एवात्मा।
नान्योपि सम आ ब्रह्मास्मीत्येवं विद्यादियात्मा वा इदमेक एवाग्र आसीद्ब्रह्म तत्तममिति चोक्तं अन्य
त्र च सर्वगतस्य सर्वात्मनो वालाग्रमात्रमप्यप्रविष्टं नास्तीति कथं सीमानं विदार्य प्रापद्यत पिपीलिकेव सुषिर-
(तुत्युक्तं। जीवव्यतिरेकमाह संसारीति। सामान्येन सर्वं वेत्तीति सर्ववित् किं तस्य सर्गः उपादानं स्वतोन्यदिति। विद्योपर्य
वसानमित्याह। नान्योपीति। केन वाक्येनोक्तमत आहात्मेति। सदेव सोम्येदमग्र आसीदिति श्रुत्यंतरेपि उक्तमित्याह। अन्यत्रेति।
अत्रानुपपत्तिं चोदयति। सर्वगतस्येति स्वेनाव्याप्तं स्वव्यतिरिक्तं प्रवेशायोग्यमिदं तु तद्विपरीतमित्यर्थः।। ।।१९।।

नन्व

एतत्प्रवेशस्याविद्यात्मकत्वान्न विरुद्धत्वं यथा जगत्सर्गादीत्यभिप्रेत्य परिहरति। अल्पमिति। नायं दोषश्चोदयितव्यः स्वार्थे स्याल्पत्वादि स्या
शंक्याह। अबद्धिति। तदेव चोद्यजातं दर्शयति। अकरणत्वेति। अद्भ्यः पुरुषनिर्माणं चाशरीरिणो नोपपद्यते। देवतानां च करमलशरीरदेशप्रवे
शादि चानुपपन्नमित्यत्र द्रष्टव्यं अत्र श्रुतेस्तात्पर्याभावादन्यप्रमाणाभावाच्चोद्यस्यार्थान्नावादनुपपत्तिरपि नास्तीति परिह
स्प १ नन्वल्पमिदं चोद्यं बहु चात्र चोदितव्यमकरणः सन्नीक्षितानुपादाय किंचिल्लोकानसृजताद्भ्यः पुरुषं
समुद्धृत्यामूर्छयत्तस्याभिध्यानान्मुखादिनिर्भिन्नं मुखादिभ्यश्चाग्न्यादयो लोकपालास्तेषां चाशनाया
दिमत्वेन संयोजनं तदायतनप्रार्थनं तेषां यथायतनप्रवेशनं सृष्टस्यान्नस्य पलायनं वागादिभिः
स्तज्जिघृक्षा इत्येतत्सर्वं सीमाविदारणप्रवेशसममेव। अस्तु तर्हि सर्वमेवेदमनुपपन्नं। न। अ
त्रात्मावबोधार्थमात्रस्य विवक्षितत्वात्सर्वोयमर्थवाद इत्यदोषः। मायावीव वा महामायावी देवः
सर्वज्ञः सर्वशक्तिः सर्वमेतच्चकार।
रति। अत्रेति तद्विवरणं सर्वोयमिति अविद्यमानत्वेपि मायामयत्वाद्दोष इत्याह मायावीवेति।।

(२०)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायामयत्वेआख्यायिकादिकिमर्थंमतआह।सुखेति।आख्यायिकादिनकेवलंसुखावबोधप्रतिपत्त्यर्थंकिंतर्हिस्वार्थपर
मित्याशंक्याह।ऐकात्म्येति।एवमनात्मत्वंप्रपंचस्यसाधितमिदानीमात्मनेदस्यापिमायामयत्वंसाधयितुंपूर्वपक्षंदर्शयति।
नन्विति।ऐक्यात्मस्वरूपपरिज्ञानादियुक्तमनुपपन्नमित्यर्थः।केतइत्याकांक्षायांतानेवदर्शयति।लोकेति।ईश्वरोद्वि
(सुखावबोधनप्रतिपत्त्यर्थंलोकवदाख्यायिकादिप्रपंचइतियुक्ततरःपक्षः।नैस्त्यख्याख्यायिका हि
दिपरिज्ञानात्किंचित्फलमिष्यते।ऐकात्म्यस्वरूपविज्ञानात्त्वमृतत्वंफलंसर्वोपनिषत्सिद्धंस्मृति
षुच्गीतायांसुसमंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरमित्यादि॰ननुत्रयआत्मानोभोक्ताकर्त्तासंसारी
जीवएकःसर्वलोकशास्त्रप्रसिद्धोऽनेकप्राणिकर्मफलोपभोगयोग्याधिष्ठानवच्चतुर्दशलोकदेह
निर्माणेनलिंगेनयथाशास्त्रप्रदर्शितेनपुरप्रासादादिनिर्माणलिंगेन॰

तीयस्तत्रप्रमाणमाह।लोकेति।अनेकेषांप्राणिनांकर्मफलोपभोगयोग्यानिअनेकाधिष्ठितानितद्वंतश्चलोकाः[illegible]राद
योदेहाश्चतेषांनिर्माणेनेत्यर्थः।अनुमानगम्यत्वेऽतिप्रसंगइत्याह।यथेतिजगज्जन्मादिलिंगेनेत्यर्थः।। २०

व्याप्तिमाह।तद्विषयेति।जीवाद्विलक्षण्यमाह।सर्वज्ञइति।कथंतर्ह्यात्मज्ञाद्वैवान्यत्वमतआह।चेतनइति।तृतीयमात्मानं
दर्शयति।यतइति।एतेषामनेकत्वेमानमाह।एवमिति।सतुत्रयआत्मानःप्रकृतेकिमायातमतआहतत्रेति।यत्सिध्यतित
तद्विषयकौशलवांस्तत्कर्त्तातक्षादिरिवेश्वरःसर्वज्ञःसर्वगतःकर्त्ताद्वितीयश्चेतनआ
सावगम्यतेयतोवाचोनिवर्त्ततेनेतिनेत्यादिशास्त्रप्रसिद्धऔपनिषदःपुरुषस्तृतीय
एवमेतेत्रयआत्मानोऽन्योन्यविलक्षणाःतत्रकथमेकएवात्माद्वितीयोऽसंसारीतिज्ञा
(तुंशक्यते॰तत्रजीवएवतावत्कथंज्ञायते।

त्प्रमाणेनैवसिद्ध्यतीतिस्थितेतावन्नेदेप्रमाणंवक्तव्यंतच्चवक्तुंनशक्यतेइतिदूषयतिजीवइति।।श्रीरामचंद्रायनमः।।

(१)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रवणादि क्रियालिंगेन तत्कर्त्तानुमीयत इति श्रुतिर्दर्शयति। तत स्ताभ्याम वगम्यत इत्याह पूर्वपक्षी नन्वेवमिति श्रवणा यगोचर आत्मेति श्रुत्यंतरेणानुमानसिद्ध अनुवादकेन विरुद्धत्वान्नेदं प्रमाणमित्याह सिद्धांती ननु विप्रतिषिद्धमि

नन्वेवं ज्ञायते श्रोतामंता द्रष्टा दृष्टा घ्रोष्टा विज्ञाता प्रज्ञातेति ननु विप्रतिषिद्धं
ज्ञायते च श्रवणादि कर्तृत्वेन अमतो मंता ऽविज्ञातो विज्ञातेति च न मते र्मंता
रमन्वीथा न विज्ञाते र्विज्ञातारं विजानीथा इति च सत्यं। विप्रतिषिद्धं यदि प्रत्य
क्षेण ज्ञायते सुखादिवत्प्रत्यक्षज्ञानं च वार्यते न मते र्मंतारमित्यादिना ज्ञायते तु
श्रवणादिलिंगेन तत्र कुतो विप्रतिषेधः।

तिभिन्नविषयत्वादनयोः श्रुत्योर्विरोधो नास्तीत्याह चोदकः सत्यमिति॥ श्रीरामचंद्रगुरवे नमः॥ ॥छ॥छ॥ २१

यथा प्रत्यक्षाविषयत्वेन तद्वदनुमानस्याप्यविषयत्वाद्विरोधो नास्तीत्याह नन्विति कानुपपत्तिरत आह यावतेति श्रवणादिक्रि याकर्त्ता नित्य आत्मा न सिध्यति श्रवणादिक्रियाकर्तृणामनेकत्वे प्रमाणाभावात् श्रवणादिक्रियालिंगानां तत्तत्काळविशिष्ट तत्तत्कर्तृमात्रानुमापकत्वात् य एवाहं पूर्वं द्रष्टाऽभुवं स एवेदानीं श्रोतास्मीति प्रत्यभिज्ञाया अंगीकृतत्वादित्यर्थः।

ननु श्रवणादिलिंगेनापि कथं ज्ञायते यावता यदा शृणोत्यात्मा श्रोतव्यं शब्दं तदा तस्य श्रवण
क्रियय्यैव वर्त्तमानत्वान्मनन विज्ञान क्रियेन संभवतः आत्मनि परत्र वा तथान्यत्रापि मनना
दिक्रियाः श्रवणादिक्रियाश्च स्वस्वविषयेष्वेव। न हि मंतव्यादन्यत्र मंतुर्मननक्रिया संभवति॥

नहि श्रवणादि प्रत्यक्षं विषयतया शब्दादीन् विषयीकरोति अकर्मतया स्वाश्रयमात्मानं बोधयति स्वत एव स्वयं स्फुर तितः प्रत्यक्ष एवात्मा न चामतो मंतेत्यादिश्रुतिविरोधः तस्यार्थवादत्वात्कर्मत्वाभावपरत्वाद्वेति प्राभाकरमतमाशंक्याह स्वस्वविषयेष्वेवेति सार्वकालीनं श्रोतृत्वं श्रूयते तन्न सिध्यति तत्कर्तुरिकर्तृत्वं च न सिध्यति संविधौ वेदनप्रकाशत्वे आत्म नो पि घटादिवत्कर्मत्वमवश्यं भवतीत्यर्थः॥ श्रीराम जयराम जय जयराम॥ श्रीकृष्ण॥ ॥ श्रीरघुनाथ॥ (२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्१

भवतु तर्हि मानसं प्रत्यक्षेणाहं प्रत्ययेन च आत्मनः सिद्धिः न च कर्मकर्तृविरोधः अनुभवसिद्धत्वात्तस्य। न च नहंप्रत्ययः इत्यादिश्रुतिविरोधः अर्थवादत्वात् इदं प्रत्ययत्वं विषयावेदकत्वात् तस्या इति। मीमांसकनां किंकपक्षमाशंकते। नन्विति। एवं च सति पटप्रत्ययविषयस्यापि पटस्याविषयत्वप्रसंगः यथाह प्रत्ययस्याहं प्रत्ययरूप आत्मा अहंप्रत्यय

ननु मनसः सर्वमेव मंतव्यं सत्यमेवं तथापि सर्वमेव मंतव्यं मंतारमंतरेण न मंतुं शक्यं यद्येवं किं स्यादिदमत्रस्यात्सर्वस्य यो मंता स मंतैवेति न मंतव्यस्यान्न च द्वितीयो मंतुर्मंतास्ति यदात्मनैव मंतव्यस्तदा येनात्मना मंतव्यो यश्च मंतव्य आत्मा तौ द्वौ प्रसज्येयातां॥ ।।। ।।।। ।।।। ।।। ।।।।।।।

विषयोपि न विषयः न चात्म्यात्स्यादितात्पर्यलिंगेषु सत्स्वर्थवादत्वेत्यभिप्रेत्य कर्मकर्तृत्वलक्षणदूषणांतरमाह। सत्यमिति। अनात्मनः सर्वस्यापि मनो विषयत्वमितियदुक्तं तत्सत्यमित्यर्थः भवतु तर्हि स्वयमेव मंता तत्राह यद्येति॥ ॥

द्रव्यबोधरूपभेदाभ्यां एकस्यैवोभयसंभवतीत्याशंक्याह। एक इति। तथाप्यभिप्रेतं न सिध्यतीत्याशंक्याह। उभयथेति। तामनुपपत्तिं दृष्टांतेन दर्शयति। यथेति। किंच सुषुप्तिकाले सर्वदा विषयोपलब्धे

एक एवात्मा द्विधा मंतृमंतव्यत्वेन विशकलीभवेद्वंशादिवदुभयथाप्यनुपपत्तिरेव यथा प्रदीपयोः प्रकाश्यप्रकाशकत्वानुपपत्तिः समत्वात्तद्वन्न च मनुर्मंतव्ये मनन व्यापाररूपः कालोस्या मननाद्यदापि लिंगेनात्मानमनुते मंता तदापि पूर्ववदेव लिंगेन मंतव्य आत्मा यश्चैतस्य मंता तौ द्वौ प्रसज्येयातामेक एव वा द्विधेति पूर्वोक्तदोषः॥ ॥

विद्यमानत्वात्तत्कर्तव्यत्वमात्मज्ञातुः स्यादित्याह। नचेति। प्रत्यक्षे दर्शितन्यायमनुमानमपि दर्शयति यदापीति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्ह्यात्मनो सिद्धेः श्रुतिविरोधः स्त्वत्कर्त्तृप्रतिपादकश्रुतिविरोधश्चस्यादिति शिष्यश्चोदयति॰ न प्रत्यक्षेणेति।
वेद्यत्वकर्त्तृत्वयोरभावेपि स्वयंप्रकाशस्यात्मनः सत्तामात्रेणोपाधिकं श्रोतृत्वादिकं संभवतीत्यभिप्रेत्य प
न प्रत्यक्षेण नाप्यनुमानेन ज्ञायते चेत्कथमुच्यते सम आत्मेति विद्यादिति कथं वा श्रोता
मंतेत्यादि॰ ननु॰ श्रोतृत्वादि प्रसिद्धमात्मनः किमत्र विषमं पश्यसि॥ यद्यपि तव न विषमं
मम तु विषमं प्रतिभाति कथं यदासौ श्रोता तदा न मंता यदा च मंता तदा न श्रोता तत्रैवं सति
पक्षे श्रोता मंता पक्षे न श्रोता नापि मंता तथान्यत्रापि यद्येवं तदा श्रोतृत्वादिधर्मवानात्मा
ऽश्रोतृत्वादिधर्मवांश्चेति संशयस्थाने कथं तव न वैषम्यं॰ यथा यदा देवदत्तो गच्छति तदा
न स्थाता गते वा यदा तिष्ठति तदा गंता न स्थाता च तदा तस्य पक्ष एव गंतृत्वं च न नित्यं गंतृत्वं
स्थातृत्वं वा तद्वत्॰ ॥ ॥ ॥

रिहरति नेत्युक्तिः सिद्धांतिनोऽभिप्रेतमतानानश्चोदयति॰ यद्यपीति॰ चोद्यं प्रश्नपूर्वकं विवृणोति॰ कथमिति दृष्टांतेन २२
चोद्यं प्रकटयति॰ यथेति॰॥

यथा प्रत्यक्षादिभिर्द्वैतप्रपंचे सिद्धेपि नेह नानास्ति किंचनेति श्रुतेरद्वितीयं वस्त्विति निश्चीयते तथा श्रोता मंतेत्यादि
श्रुत्यनुसारेण यदा श्रोतृत्वादिधर्मवानात्मेत्याश्रीयते तदा संशयो न वस्येवेत्याह स एव चोदकः अत्रेति नियुक्ति

अत्र काणादादयः पश्यंति पक्षप्राप्तेनैव श्रोतृत्वादिना आत्मालोच्यते श्रो
ता मंतेत्यादि संयोगजत्वमयोगपद्यं च ज्ञानस्य ह्याचक्षते दर्शयंति चा
न्यत्रमना अभूवं नादर्शमित्यादि ॥ ॥ ॥

कंतेषां दर्शनमप्रामाणिकमित्याशंक्याह॰ संयोगजमिति॰ आत्मनः संयोगजत्वमत एवायोगपद्यं ज्ञान
स्याचक्षत इति यथा गुणवद्द्रव्यमित्यादि प्रमाणे युक्तिभिश्चैतेन्यस्यत्वं तैर्व्याख्यातमप्येकमेवाद्वितीयमिति
श्रुतिविरुद्धत्वान्नाश्रीयते तद्वत् ज्ञानस्यायोगपद्यमपि नाश्रीयतामित्याशंक्याह॰ दर्शयंति चेति॰ ज्ञानानां यौ
गपद्यं श्रुतिविरुद्धत्वादन्यथासिद्धिविरोधाद्वायोगपद्यमेव ज्ञानस्यायुक्तमित्यर्थः॥ ॥श्री राम समर्थ॥

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युक्तिं चदर्शयतीत्याह॰ युगपदिति॰ एतत्प्रामाणिकं चेदिष्टमेवास्मीयतामिति नैयायिकः सिद्धांती नवत्वेवमिति। आह शिष्यः।
अस्त्वेवमिति॰ ममापीष्टमेवेत्याशंक्याह॰ अयमर्थस्त्विति॰ श्रोत्रत्वादिधर्मस्या विशेषेण सार्वकालीनत्वं कृते पक्षे श्रोत्रत्वादि

युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति चन्यायं नवत्वेवं किंतवनेष्टप
येवं स्यादस्त्वेवं तवेष्टं चेदयमर्थस्तु न भवति किंन्तश्रोतानमंतेत्या
दिरयमर्थः। नश्रोतानमंतेत्यादिवचनात्॥ ॥ ॥

धर्मकं श्रुतेरर्थो न भवति अतो मां परीक्षयितुं भ्रामयसि भवानित्यर्थः। आहेतरः। किंनेति॰ यदि श्रोतेत्यादावा
पेक्षिकश्रोत्रत्वादिरर्थो न भवति तर्हि श्रोतेत्यादिनियमेनाश्रोत्रत्वादिरर्थ इत्याह चोदकः नेति। तत्र हेतुमाह। श्रोतेति। २४

खे १

अनयोरपि कृत्ययोरविरोधः स्यात् अत्र काणादियः पश्यंतीत्यादिना दर्शितः इदं चोद्यमनुपपन्नमिति शुद्धान्तिसंधि
राह। आहापरः। नन्विति॰ यदर्थं प्रयासः सिद्धांतिनस्तत्स्वय मेवाह चोदकः नेति॰ अभ्युपगमोप्यसिद्ध इति न वक्तव्य
मित्याह॰ नहीति॰ एवमंगीकारेपि विरोध इति चोद्यं निगमयति॰ एवमिति॰ परिशेषसिद्धं सिद्धांतमाह सिद्धांती॰ नो
नवस्तुतः॥१ ननुपाक्षिकत्वेन प्रसक्तं तयोर्निषेधेन श्रोत्रत्वाद्यभ्युपगमान्नहि श्रोतुः श्रुतेर्विपरिलोपो
मे विद्यत इत्यादिश्रुतिरेवं तर्हि निषेव श्रोत्रत्वाद्यभ्युपगमेव प्रत्यक्षविरुद्धं युगपज्ज्ञा
नोत्पत्तिर्ज्ञानानावश्यात्मनः कल्पितः स्यात्तन्नानिष्टमिति॥ नो भयदोषोपपत्तिः रात्मनः कृ
त्यादिश्रोत्रत्वादिधर्मवत्त्वश्रुतेः॥ ॥ ॥
नयेति॰ प्रत्यक्षादिविरोध एको दोषः नित्यश्रोत्रत्वादिकृतैनियत प्रसंगो पर अत्र हेतुः मा हा मन इति आत्मनोयत्स्व
रूपविज्ञानं तन्नित्यमेव तेन नित्यश्रोत्रत्वादिश्रवणं तस्याकारकत्वेनाविषयत्वात् अमना इत्यादिकृते रंतःकरण
ज्ञानानाम नित्यत्वात्तद्विषयप्रत्यक्षादिविरोध इत्यर्थः॥ ॥ ॥

(२९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति।

यं प्रपंचयति अनित्येऽ अनित्यत्वे हेतुः संयोगेति तत्र हेतुर्मूर्त्तानामिति अनित्यसंयोगादिधर्मिणी वृत्ते
रान्त्यहेतदृष्टांतः यथेति। एतद्विषयं प्रत्यक्षादि आत्मस्वरूपज्ञानस्य अजन्यत्वाद्विषयत्वाद्भुतेः श्रोतेत्यादिश्रु
२ अनित्यानां मूर्त्तानां चक्षुरादीनां दृष्ट्याद्यनित्यमेव संयोगवियोगधर्मिणां यथाग्नेः ज्वलनं
तृणादिसंयोगजत्वात्तद्वन्न तु नित्यस्यामूर्त्तस्यो संयोगवियोगधर्मिणः संयोगजदृष्ट्याद्यनि
त्यधर्मवत्त्वं संभवति तथा च श्रुतिः न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्याद्येवं तर्हि द्वे दृष्टी चक्षु
षोऽनित्या दृष्टिर्नित्या चात्मनस्तथा च द्वे श्रुती श्रोत्रस्यानित्यानित्यात्मस्वरूपस्य तथा मितिर्विज्ञा
तिश्चेति एवं ह्येवैयं श्रुतिरुपपन्ना भवति दृष्टेर्द्रष्टा श्रुतेः श्रोतेत्याद्याः ॥ ॥

तिश्रुतिविषयत्वमित्याह नत्वनित्यस्येति अत्राप्यनिष्टमापादयति। एवं तर्हीति दृष्टिद्वयं लोकविरुद्धमित्यर्थः अविवे
किनां लोकानां विरोधः स्तिष्ठतु श्रुतिबलादिदृष्टमेवांगीकर्त्तव्यमित्याह सिद्धांती एवमिति ॥ ॥ २५

लोकविरोधोऽपि नास्तीत्याह लोकोऽपीति निरस्त्दृष्टेः प्रसिद्धिमुदाहरणेन दर्शयति वदति स्फुद्धृतचक्षुरिति
लोकेऽपि प्रसिद्धं चक्षुषस्तिमिरागमापाययोर्नष्टा दृष्टिर्जाता दृष्टिरिति। चक्षुर्दृष्टेरनित्यत्वं
तथा च श्रुतिमत्यादीनामात्मदृष्ट्यादीनां च नित्यत्वं मे अवलोके वदति स्फुद्धृतचक्षुः प्रसिद्ध
२६ स्वप्ने मया भ्राता दृष्टेति तथां तर्गतबाधिर्यः स्वप्ने श्रुतो मं त्रोऽद्येत्यादि यदि हि चक्षुःसं
योगजैवात्मनोऽनित्या दृष्टिस्तन्नाशेन नश्येत्तदा उद्धृतचक्षुः स्वप्ने नीलपीतादीन्न पश्ये
न्न हि द्रष्टुर्दृष्टेरित्याद्या च श्रुतिरनुपपन्ना तच्चक्षुः पुरुषे येन स्वप्ने पश्यतीत्याद्या च नि
त्यात्मनो दृष्टिर्व्याप्ता नित्यदृष्टेर्ज्ञापिका।

व्यतिरेकमाह यदीति कथं तस्यात्मदृष्टेरनित्यत्वप्रतिभासः सुगुप्त्यादौ केषांचिद्वादिनां च तथांगी
कार इत्यतः आह नित्यात्मन इति ॥ ॥ ॥ (26)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्राह्यग्राहकसंबंधवत्वेपिबाह्यदृष्टेरपिविभक्तानित्यधर्माध्यासोनसंभवतीत्यत आह। बाह्येति अध्यासेदृष्टांतःस्पष्टो
यथेतिश्रुतिरप्यत्रप्रमाणमित्याह।तथाचेति।उक्तमुपसंहरति।तस्मादिति। अनित्यदृष्टिवशाज्जीवत्वंसोपाधिदृष्टिवशादीश्व
रत्वंनिरुपाधिकदृष्टिवशात्परमात्मत्वमितितेषांभेदकल्पनाचोपपन्ना भवतीत्याह।जीवेश्वरेति।देहव्यतिरिक्तात्मविषयप्रतिप
बाह्यदृष्टेश्चोपजनापायाद्यनित्यधर्मवत्वात्तद्ग्राहिकायाआत्मदृष्टेस्तद्वदेवभासकत्वेमनित्यत्वादि
भ्रांतिनिमित्तंलोकस्येतियुक्तं यथाभ्रमणादिधर्मवद्दृष्टौ तादिवस्तुविषयादृष्टिरपिभ्रमतीवतद्वत्त
थाचश्रुतिर्ध्यायतीवलेलायतीवेतितस्मादात्मदृष्टेर्नित्यत्वान्नयोगपद्यमयोगपद्यंवास्तिबाह्या
नित्योपाधिवशात्तुलोकस्यतार्किकाणांचागमसंप्रदायवर्जितत्वादनित्यात्मनोदृष्टिरितिभ्रांतिरु
पपन्नैवजीवेश्वरपरमात्मभेदकल्पनाचैतन्निमित्तैव।तथाअस्तिनास्त्यस्तिनास्तीत्याद्याश्चया
वंतोवाङ्मनसयोर्भेदायत्रैकंभवंतितद्विषयायानित्यायादृष्टेर्निर्विशेषायाअस्तिनास्त्यस्तिनास्तीति॥
त्तिरपिसोपाधिकविषयेत्याह।तथास्तिनास्तीति।अस्तीतिमीमांसकाः।नास्तीतिचार्वाकाः।अस्तीतिविज्ञानवादिनोनास्ती
त्येकोतवादिनः।निरुपाधिकात्मविषयेतुकल्पनाकिमितिनोपपद्यतइत्याकांक्षायांसंग्रहवाक्यंविवृणोति।यावंतइ
ति।यत्रैकंभवंतीत्यध्याहारेणान्वयः तद्विषयायाइति।वाङ्मनसयोर्भेदाधिष्ठानभूतायाइत्यर्थः। अत्रहेतुर्नित्याया
इति। अत्रहेतुर्निर्विशेषायाइति॥ ॥ ॥ २६

संग्रहवाक्यागतादिशासार्थंदर्शयति एकमित्यादिना एकमित्यनेनैकत्वसंख्यावादिन्यैकदेशीनानेतितार्कि
कादयः गुणवदितिचागुणवदितिसांख्याः ज्ञानेकर्मेतिमीमांसकाः ज्ञानेकर्त्रेतिसांख्याः अथवाज्ञानस्वरूप
इतिसांख्याः तद्विपरीतइतिकाणादाः क्रियावदितिमीमांसकाः अक्रियमितिसांख्याः स्वस्वरूपमितिभाट्टादयः

एकंनानागुणवदगुणवज्ज्ञानातिनजानातिक्रियावदक्रियंफलवदफलंस
बीजंनिर्बीजंसुखंवदुःखंमध्यमंमध्यमंभन्यमभन्यंपरोहमन्यइतिवा॥

दुःखमितिसुखस्वरूपयोग्योनभवतीतिकाणादादयः अथवासुखस्यापिदुःखत्वादुःत्वाद्दुःखमितिअथवावि
ज्ञानवादिमतेदुःखाकारज्ञानस्याप्यात्मत्वान्मध्यमितिकात्ततोदेशतश्चपरिच्छिन्नमितिनग्नादयः अमध्यं
तद्विपरीतमितिकाणादादयः भन्यमितिभन्येवादिनः नभन्यमित्यन्येपरोहंपरमात्मेत्येकदेशिनः अन्यईश्वरादन्यइतितार्किकाः॥

२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इयं कल्पना निर्विशेषदृष्टिविषया न भवतीत्याह। सर्वेवागिति॰ अत्यंतागोचरत्वे दृष्टांतः। श्रुतिश्च तत्रशीव एव तावत्कथं ज्ञायत इत्यादिना आत्मनो विषयत्वमुक्तोसिं तिना तस्य को निर्वाह इति विनीतः सं नू विनेयः पृच्छति।

सर्ववाक्प्रत्ययागोचरे यो विकल्पयितुमिच्छति सनूनं खमपि चर्मवद्वेष्टयितुमिच्छति सोपानमिव च पद्भ्यामारोढुं जच्छे खे च मीनानां वयसां च पदं दिदृक्षते नेति नेति यतो वाचो निवर्तंत इत्यादिश्रुतिभ्यः को अद्धा वेदेत्यादिमंत्रवर्णात्। कथं तर्हि तस्य सम आत्मेति वेदनं ब्रूहि केन प्रकारेण तमहं सम आत्मेति विद्यां॥ ॥ ॥

कथमिति। कानुपपत्तिरित्याशंक्या विषयत्वात्तस्य वेदनप्रकारानुपपत्तिरित्याह॰ ब्रूहीति॥ २७

तत्प्रकारमाख्यायिकाव्याजेन दर्शयत्याचार्यः अत्रेति॰ अहं मनुष्य इत्यपरोनुभवे पिकस्य चित्कल्पितस्य वाक्यमात्रासंशयवत्वान्मुग्धत्वे तस्य मुग्धतामिति प्रत्यक्षसिद्धे ऽर्थे नाप्तवाक्यशंका तस्य महद्वाक्यमात्रेण निश्चयो न भविष्यति तस्मात्परिशिष्यप्रमाणेनानुभवसिद्धमेतन्मनुष्यत्वं बोधयिष्यामीत्यर्थः। एवं परिशिष्यप्रमाणसिद्धे॥

अत्राख्यायिकामाचष्टे॰ कश्चित्किल मनुष्यो मुग्धः केनचिदुक्तः कस्मिंश्चिदपराधे धिक्त्वां नासि मनुष्य इति स मुग्धतयात्मनः प्रत्यापयितुं कंचिदुपेत्याह॰ ब्रवीतु भवान् कोहमस्मीति स तस्य मुग्धतां ज्ञात्वा क्रमेण बोधयिष्यामीति स्थावराद्यात्मभाव अपोह्य न त्वं मनुष्य इत्युक्त्वोपरराम॰ स तं मुग्धः प्रत्याह भवान्मां बोधयितुं प्रवृत्तः तूष्णीं बभूव किं न बोधयतीति तादृगेतद्भवतो वचनं॥ ॥ ॥

मुग्धः पृच्छतीत्याह॰ स तमिति॰ यथा प्रत्यक्षानुमानसिद्धे ऽर्थे मुग्धस्य प्रश्नस्तथानुभवतो मंतेत्यादिश्रुतेः कर्तृकर्मत्वविरोधलक्षणायुक्तेश्चाविषयतया आत्मानुभवो न भवतीति सिद्धे ऽर्थाद्विषयादनुभव इति च सिद्धे कथं तर्हि तस्येति नव प्रश्न इत्याह ० ॥ तादृगिति॥ ॥ श्रीरामजयरामजयजयराम॥ ॥ श्रीराम॥

28

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुमुग्धस्यापिनायमपराधइत्याशंक्याह॰ नासीति॰ अनयाक्षेपगंभीरपाभवतोगंभीरो स्यापिममंदबुद्धेरात्मवेदनप्र
कारेतेनसिद्धत्वमित्याह। तस्माद्यथेति॰ स्वयंप्रकाशतयासिद्धोनात्मेत्याशंक्याहनह्यग्नेरिति॥ उक्तार्थेश्रुतिंप्रमा
नासि मनुष्यइत्युक्तोमनुष्यत्वमात्मनोनप्रतिपद्यतेयः सकथंमनुष्योसी स्युक्तोमनुष्यत्वमा पि
प्रदेश त्मनः प्रतिपद्येत। तस्माद्यथाशास्त्रो एवात्मवि बोधविधिर्नान्योनह्यग्नेरदाह्यंतृणाद्यन्येन
केनचिद्दग्धुंशक्यं॰ अतएवशास्त्रमात्मस्वरूपंबोधयितुंप्रवृत्तंसदमनुष्यत्वप्रतिषेधेनैव। नेति
नेत्युक्त्वोपरराम। तथानंतरमबाह्यमयमात्माब्रह्मसर्वानुभूरित्यनुशासनंतत्वमसियत्रत्वस्य
सर्वमात्मैवाभूत्तत्केनकंपश्येदित्येवमाद्यपि यावदयमेवंयथोक्तमिममात्मानंनवेत्तितावदयंबा
ह्यानित्यदृष्टिलक्षणमात्मत्वेनोपेत्याविद्ययोपाधिधर्मानात्मनोमन्यमानोब्रह्मादिस्तंबपर्यंतेषु
पुनःपुनरावर्तमानोऽविद्याकामकर्मवशात्संसरति॥ ॥ ॥

णायनविचारमुपसंहरति॥ अतएवेति। इदानींपुरुषेहवाइत्यादिवाक्यमवतारयति॰ यावदिति॥ श्रीराम २८

किंविलक्षणः संसारइत्याकांक्षायायोनेर्योन्यंतरप्राप्तिलक्षणइत्याह॰। एवमितितत्वकोऽग्नाः श्रुत्योच्यतइतितदाह। एव
मिति॰ सचवैराग्यार्थमित्याह। वैराग्येति। धूमादिक्रमेणेति॰ तेधूममभिसंभवंतिधूमाद्रात्रिमित्यादिश्रुतेनेत्यर्थः क्षीणकर्मा
सएवंसंसारन्नुपात्तदेहेंद्रियादिसंघातंत्यजतिस्य कोऽन्यमुपादत्तेपुनःपुनरेवमेवनदीस्त्रोतो
वज्जन्ममरणप्रबंधाविच्छेदेनवर्त्तमानः कानिरवस्थांनिर्वर्त्ततइत्येतमर्थंदर्शयंत्याहश्रुतिर्वैराग्य
पुरुषेहवाअयमादितोगर्भोभवति॥
हेतोः अयमेवअविद्याकामकर्मवानूयज्ञादिकर्मकृत्वाअस्माल्लोकाद्धूमादिक्रमेणचंद्रमसंप्राप्य
क्षीणकर्मावृष्ट्यादिक्रमेणेमंलोकंप्राप्यान्नभूतःपुरुषाग्नौहुतस्तस्मिन्पुरुषेवैअयंसंसारीरसादिक्रमे
णादितः प्रथमं॥ ॥ ॥
वृष्ट्यादिक्रमेणेतियावत्संपातमुषित्वाअथैतमेवाध्वानंपुनर्निवर्त्ततेयथेतमाकाशमाकाशाद्वायुरित्यादिश्रुतिसिद्धेनेत्यर्थः
पुरुषो ग्नाविति॰ पुरुषोवावगौतमाग्निः पर्जन्योवावगौतमाग्निः पृथिवीवावगौतमाग्निरित्यनंतरंपुरुषोवावगौ
तमाग्निस्तस्मिन्नेतस्मिन्नग्नौदेवाअन्नंजुह्वतीतिश्रुत्युक्तइत्यर्थः। रसादिक्रमेणेति॥ ॥ ॥ २९

जग्धादन्नाद्रसो सान्नि:न्नो(?) चितंजायतेरसात्रजा यतेरुधिरान्मांसंमेदसस्ततोभव:।मेदसोस्त्थीनिजा
यंतेमज्जाप्यस्थिसमुद्भवात त:शुक्रस्य निष्पत्तिबीजमात्र:सज्जासहेसनेनक्रमेणे सर्थ।विहृष्ट शरीर

रेतोरूपेणगर्भोभवतीतितदाह यदेतत्पुरुषेरेतस्तेनरूपेणेतितच्चैतद्रेतोन्नमयस्यपिंड
स्यसर्वेभ्योंगेभ्योरसादिलक्षणेभ्य:तेज:सार रूपंशरीरस्यसंभृतंपरिनिष्पन्नंतत्पु
मि२ रुषस्यांभृतत्वादात्मातस्मात्मानंरेतोरूपेणगर्भीभूतमात्मन्येवस्वशरीरेबिभर्तिधारयति।
यदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेज:संभृतमात्मन्येवात्मानंबिभर्ति॥

स्त्रीत्वरूपोपाधिविशेष तांस्त्रीगर्भंबिभर्तीत्यनेनसोग्रएवकुमारमिसंबंधमित्यतआह। ५
धारयतीति॥

तद्रेतोयदायस्मिन्काले भार्यामृतुमतीतस्यांयोषाग्नौस्त्रियां सिंचत्युपगच्छतिगच्छन्नथतदा एतद्रेतआत्मनोगर्भंकृतंज
नयतिपितातदस्यपुरुषस्यस्थानान्निर्गमनंरेत:सेककाले रेतोरूपेणास्यसंसारिण:प्रथमंजन्म प्रथमावस्थाभिव्यक्ति:

तद्यदास्त्रियांसिंचत्यथैनज्जनयतितदस्यप्रथमंजन्मतत्स्त्रियाआत्मभूयं
गच्छतियथास्वमंगंतथातस्मादेनांनहिनस्ति॥ ॥ ॥

स्तदेतदुक्तंपुरस्तादसावासामुमात्मानमित्यादिना।तदेतद्रेतोयस्यांस्त्रियांसिक्तंसत्तस्याआत्मभूयंआत्मात्र्यति
रेकतोयथापितुरेवंगच्छतिप्राप्नोतियथास्वमंगंस्तनादितथा।तद्वदेवतस्माद्धेतोरेनांमातरंसगर्भांनहि स्तिकी
टकादिवद्यस्मात्स्तनादिस्वांगवदात्मभूयंगतंतस्मान्नहिनस्तिनबाधत इत्यर्थ:॥ ॥ ॥श्रीराम

३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽग्रेऽविभावयतीतिसंबंधइत्याह॥ स्वपितेति॥ ॥ ॥श्रीरामजयरामजयजयराम॥ ॥श्रीगोपाल॥

सांतर्वत्नीएतमस्यपत्नुरात्मानमत्रात्मनउदरे प्रविष्टंगतंबुध्वाभावयतिवर्द्धयतिपरिपालयतिगर्भेविरुद्धाशनादिपरिहारमनुकूलाशनाद्युपयोगंचकुर्वतीसाभावयित्रीवर्द्धयित्रीभर्तुरात्मनोगर्भस्यभावयितव्यावर्द्धयितव्यारक्षयितव्याचभर्त्रोपि

सास्यैतमात्मानमत्रगतंभावयतिसाभावयित्रीभावयितव्याभवतितंस्त्रीगर्भेबिभर्त्तिसो
ग्रएवकुमारंजन्मनोग्रेऽधिभावयतिसयत्कुमारंजन्मनोग्रेऽधिभावयत्यात्मानमेवंद्भावयति॥ ॥

वति न ह्युपकारप्रत्युपकारमंतरेणलोकेकस्यचित्केनचित्संबंधउपपद्यते तंगर्भेस्त्रीयथोक्तेनगर्भधारणविधानेनबिभर्त्तिधारयतिप्राक्जन्मनः सपिताअग्रएवपूर्वमेवजातमात्रंजन्मनोध्यूर्ध्वंजन्मतोजातंकुमारंजातकर्मादिनापिताभावयतिसपितायद्यस्मात्कुमारजन्मरूपेण जायते तथाह्युक्तं। पतिर्जायांप्रविशतीत्यादि॥ ॥ ॥श्रीराम॥ २

तत्किमर्थमात्मानंपुत्ररूपेणजनयित्वाभावयतीत्युच्यते एषांलोकानांसंतत्येअविच्छेदायेत्यर्थः। विच्छिद्येरन्हीमेलोकाःपुत्रोत्पादनादियदिनकुर्युःकेचनएवंपुत्रोत्पादनादिकर्माविच्छेदेनैवसंतताःप्रबंधरूपेणवर्त्तंतेहिय

एषांलोकानांसंतत्याएवंसंतताहीमेलोकास्तदस्यद्वितीयंजन्म॥

स्मादिमेलोकास्तस्मात्तदविच्छेदायतेनकर्त्तव्यंनमोक्षायेत्यर्थः तदस्यसंसारिणःकुमाररूपेणमातुरुदराद्यन्निर्गमनंतद्धेतोरूपापेक्षयाद्वितीयंजन्मद्वितीयावस्थाभिव्यक्तिरस्यपितुः॥ ॥ ॥श्रीसदाशिवायनमः॥

टीका ...र्थिकमर्थंदर्शयति तस्मादिति

(३)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रतिविद्यायामिति यदा प्रैष्यन्मन्यते पुत्र मा त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं

सोयं पुत्रात्मा पुण्येभ्यः शास्त्रोक्तेभ्यः कर्मभ्यः कर्मनिष्पादनार्थं प्रतिनिधीयते
पितुः स्थाने प … त्राकर्तव्यं तत्करणाय प्रतिनिधीयत इत्यर्थः तथा संप्रति
सोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते थास्या
यमितर आत्मा कृतकृत्यो वयोगतः प्रैति ॥ ॥
विद्यायां वाजसनेयके पित्रानुशिष्टो ब्रह्माहमित्यादि प्रतिपद्यत इत्यथानंतरं पुत्रे निवे
श्यात्मनो भारं अस्य पुत्रस्येतरो यः पित्रात्मा कृतकृत्यः कर्तव्यादृणान्मुक्तः कृतकर्तव्य इत्य ९
र्थः वयोगतो गतवयो जीर्णः सन् प्रैति म्रियते ॥ ॥ ✗ ॥

यज्ञोहं लोक इति स्वकीयकर्तव्यतापाशः पुत्रे समर्पणं श्रूयत इत्यर्थः ॥ ॥श्री शालाशंकराय नमः॥ ३१॥

तृणजलायुकावदिति यथा तृणजलायुका तृणस्यांतं गत्वा ऽन्यमाक्रममाक्रम्यात्मानमुपसंहरतीति श्रुतिसिद्धेनेत्यर्थः ॥

स इतोस्मात्प्रयन्नेव शरीरं परित्यजन्नेव तृणजलौकावद्देहांतरमुपाददानः कर्मजितं
पुनर्जायते तदस्य मृत्वा प्रतिपत्तव्यं यत्तृतीयं जन्म ननु संसारतः पितुः सकाशाद्रेतोरूपे
ण प्रथमं जन्म तस्यैव कुमाररूपेण मातुर्द्वितीयं जन्मोक्तं तस्य तृतीयं जन्म निवक्तव्यं प्रेतस्य पि
तुर्जन्म तृतीयमिति कथमुच्यते नैष दोषः। पितापुत्रयोरेकात्म्यस्य विवक्षितत्वात्सोपि पुत्रः

स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म०

स्वपुत्रे भारं निधाय इतः प्रयन्नेव पुनर्जायते। यथा पिता तदन्यतं … तरत्राप्युक्तमेव भवती श्लोकमि
तिमन्यते श्रुतिः पितापुत्रयोरेकात्मत्वात्। एवं संसरन्नवस्थाव्यक्तित्रयेण जन्ममरणप्रबंधा
रूढः सर्वो लोकः संसारसमुद्रे निपतितः कथंचिद्यदा श्रुत्युक्तमात्मानं विजानाति यस्यां कस्यांचि
दवस्थायां तदैव मुक्तसंसार … निर्बंधनः कृतकृत्यो भवतीति ॥ ॥ ॥ (३२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्वस्तु ऋषिणा मंत्रेणाप्युक्तमित्याह। गर्भेनुसन्निति। गर्भे मातुर्गर्भशये एव सन्नु इति वितर्के अ
नेकजन्मांतरभावनापरिपाकवशाद्देवानां वामदेव्यादीनां जनिमानि जन्मानि विश्वा विश्वानि
सर्वाणि अन्ववेदं अहं अहो अनुबुद्धवानस्मीत्यर्थः। शतमनेकं बह्व्यो मा मां पुर आयसीराय
स्यः लोहमय्य इवाभेद्यानि शरीराणीत्यभिप्रायः। अरक्षन् रक्षितवत्यः। संसारपाशनिर्गम

तदुक्तमृषिणा गर्भे नु सन्नन्वेषामवेदमहं देवानां
जनिमानि विश्वा। शतं मा पुर आयसीररक्षन्नधः श्ये
नो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच॥

नात् अधो अधः श्येन इव जालं भित्त्वा जवसा आत्मज्ञानकृतसामर्थ्येन निरदीयं निर्गतो
स्म्यहो गर्भ एव शयानो वामदेव ऋषिरेवमुवाच एतत्॥ ॥ ॥ ३२

संसारस्वरूपानेन ब्राह्मणेनोक्तं संसारनिवृत्तिर्मंत्रेणोच्यत इत्याह। स वामदेव इति प्रसिद्धः स्वर्गं व्यावर्णयति। अज इत्यादिना। स वा एष महानज आत्मा
ऽजरोऽमरोऽमृतोऽभयो ब्रह्ममयः सर्वज्ञः स सर्वं वेत्तीति तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिश्रु
स वामदेव ऋषिर्यथोक्तमात्मानमेवं विद्वानस्माच्छरीरभेदाच्छरीरस्याविद्यापरिकल्पितस्य आयसवन्निर्भेद्यस्य जनन
मरणाद्यनेकानर्थशताविष्टशरीरप्रबंधस्य परमात्मज्ञानामृतोपयोगजनितवीर्यकृतभेदाच्छरीरोत्पत्तिबीजाविद्यादिनिमित्तो
पमर्दहेतोः शरीरविनाशादित्यर्थः। ऊर्ध्वः परमात्मभूतः सन्नधोभावसंसारादुत्क्रम्य ज्ञानावद्योतितामलसर्वात्मभावमाप
स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन्स्वर्गे
लोके सर्वान्कामानाप्त्वामृतः समभवत्समभवत्॥४॥
न्नः सन्नमुष्मिन्यथोक्तेऽजेऽजरेऽमरेऽमृतेऽभये सर्वज्ञे पूर्वेऽनपरेऽनन्तरेऽबाह्ये प्रज्ञानामृतैकरसे प्रदीपवन्निर्वाणमत्यगमत्। स्वर्गे २ स्वे १
स्य लोकेस्मिन्नात्मनि स्वे स्वरूपेऽमृतः समभवदात्मज्ञानेन पूर्वमाप्तकामतया जीवन्नेव सर्वान्कामानाप्त्वेत्यर्थः। द्विर्वचनं
नं सफलस्य सोदाहरणस्यात्मज्ञानस्य परिसमाप्तिप्रदर्शनार्थम्। इत्यैतरीयोपनिषदि शांकरीये भाष्ये पंचमोऽध्यायः॥५॥

तिभ्यः॥ इत्यैतरीयभाष्यानंदगिरीये पंचमोऽध्यायः॥५॥ श्रीरामचन्द्रार्पणमस्तु॥ ॐ तत्सद्ब्रह्मार्पणमस्तु॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोयमितिकेषांप्रश्नः। कोवा पूर्वेण संबंधोस्येत्याशंक्याह। इतिब्रह्मविद्येति॰ मोक्षस्यात्यंतमलौकिकत्वेनतज्ज्ञानासंभवमपाकरोतिब्रह्मविदिति॰ तत्साधनं ब्रह्मज्ञानं वक्तुंतातेद्विजिज्ञासवइत्याह ब्रह्मविदिति॰ फलश्रवणेपि केषांचिदेव मुमुक्षुत्वेकारण
इतिब्रह्मविद्यासाधनत्वेनसर्वात्मभावफलप्राप्तिंवामदेवाद्याचार्यपरंपरयाश्रूयमाणां
ब्रह्मवित्परिषद्यत्यंतामुपलभ्यमानां मुमुक्षवो ब्राह्मणा अधुनातना ब्रह्मजिज्ञासवोऽनित्यात्सा
ध्यसाधनलक्षणात्संसाराद्राजवंजवीभावाद्व्यावृत्तिस्वबोधविचारयंतोन्योन्यं पृच्छंति॰ कथंयमासा
कोयमात्मेतिवयमुपास्महे
नमयमात्मेतिसाक्षाद्वयमुपास्महे कः स आत्मेति यं चासाननमयमात्मेतिसाक्षादुपासीनो
वामदेवो मृतः समभवत्तमेववयमप्युपास्महे कोनुखलुस आत्मेति॰ ॥ ॥

माह। अनित्यादिति। क्षणिकादित्यर्थः। यमित्ययमितिवापदच्छेद इत्याह। यमितिकः सदेहोवा-इंद्रियाणिवामनोवा २२
बुद्धिर्वाऽहंकारोवाप्राणोवाएतेषांसंघातोवेत्यर्थः। आत्मोपासनस्यकाप्तिरत आह यंचेति॰ ॥ ॥
प्रा

अतिक्रांतश्रुत्यक्षरैरेवसप्रश्नः संकोचितइत्याह। एवमितिएवमेवेदंब्रह्म तत्त्पत आह द्वेब्रह्मणीइति। तत्रहेतुमाह। इतरेति। तद्द्वयोरेकस्यैवात्मत्वमितिसंज्ञयाभावस्तत्राहतेचेति॰ तेएवदर्शयति। अनेकेति। प्राणस्यायंनिर्देशः स नास्यैवेत्यतआहकारणांतरेति।
एवंजिज्ञासापूर्वमन्योन्यंपृच्छतामतिक्रांतविशेषविषयश्रुतिसंस्कारजनितास्मृतिरजायत
तेप्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषं॰ सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यत॰ एतमेवपुरुषं
द्वेब्रह्मणीइतरेतरप्रातिकूल्येनप्रतिपन्नेइतितेचास्यपिंडस्यात्मभूतेतयोरन्यतरआत्मो
पास्योभवितुमर्हतियोत्रोपास्यः कतरोनुसआत्मेतिविशेषनिर्द्धारणार्थंपुनरन्योन्यंप
कतरः स आत्मा।
प्रच्छुः विचारयंतः पुनस्तेषांविचारयतांविशेषविचारणास्पदविषयामतिरभूत्। कथं द्वे वस्तुनी अस्मि
न्पिंडेउपलभ्येतेअनेकभेदभिन्नेनकरणेनोपलभ्यतेयः श्रोपलभ्यते कारणांतरोपलब्धविषयस्मृ
तिप्रतिसंधानात्तत्रनतावद्येनउपलभ्यतेसआत्माभवितुमर्हति॰ ॥ ॥
तत्रकारणस्यसंप्रतिपन्नत्वाद्वाहंसेनास्तीत्याह। तत्रेति॰ प्रथमस्यैकत्वं तत्राह तस्मादिति॰ ॥ श्रीराम ॥ 35

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणसंवादादाविति तव वयं स्मस्त्वमस्माकमसीत्यादावित्यर्थः। इदानीं मनयाश्रुत्या निर्णयप्रकारमाह तस्मादिति ॥
केन पुनरुपलभ्यत इति उच्यते। येन वा चक्षुषा रूपं पश्यति येन वा शृणोति श्रोत्रेण शब्दं येन वा घ्राणभूतेन
गंधानाजिघ्रति येन वा करणभूतेन वाचं नामात्मिकां व्याकरोति गौरश्व इत्येवमाद्यां साध्वसाध्विति च ये
व नवा जिह्वाभूतेन स्वादु वा स्वादु विजानातीति। किं पुनस्तदेकमनेकधा भिन्नं करणमित्युच्यते। यदुक्तं पुरस्तात्
येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्या
करोति येन वा स्वादु चास्वादु च विजानाति यदेतद्धृदयं मनश्चैतत् ॥
प्रजानां रेतो हृदयं हृदयस्य रेतो मनो मनसा सृष्टा आपश्च वरुणश्च हृदयान्मनो मनसश्चंद्रमास्तदे
वैतद्धृदयं मनश्चैकमेतत्तु अनेकधा। एतेनांतःकरणेनैकेन चक्षुर्भूतेन रूपं पश्यति श्रोत्रभूतेन शृणोति
घ्राणभूतेन जिघ्रति वाग्भूतेन वदति जिह्वाभूतेन रसयति स्वेनैव विकल्पनारूपेण मनसा विकल्प
यति हृदयरूपेणाध्यवस्यति तस्मात्सर्वकरणव्यापकमेकमिदं सर्वोपलब्ध्यर्थमुपलब्धुः तथा च कौषीतकीनां
प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोतीत्यादि वाजसनेयके च म
रय नसा ह्येव [illegible] पश्यति मनसा शृणोति हृदयेन हि रूपाणि जानातीत्यादि। तस्माद्धृदयमनोवाच्यस्य सर्वोपलब्धिकरणत्वं प्रसिद्धं। तदाह
कश्च प्राणो यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति ब्राह्मणं करणत्वं हि तद्रूपश्च प्राण इत्यवोचाम प्राणसंवादादौ तस्मात्तूपपन्नं
प्रापयतत्तद्ब्रह्म तदुपलब्धुरुपलब्धिकरणत्वेन गुणभूतत्वान्नैव ब्रह्मोपास्य आत्मा भवितुमर्हति तस्मात्पारिशेष्याद्यस्योपलब्धुरुप ॥२४

वि३

उत्तरो ग्रंथः परमात्मप्रतिपादक इत्याह तदेतदंतःकरणेति कलादि परिज्ञानमिति कलाविद्योच्यते कलादिपरिज्ञा
इति निश्चयं कृतवंतस्तदेतदंतःकरणोपाधिस्थस्योपलब्धुः प्रज्ञानरूपस्य ब्रह्मण उपल
ब्ध्यर्थानि अंतःकरणस्य वृत्तयो बाह्यांतर्विषया या स्ता इमा उच्यते संज्ञानं संज्ञप्तिश्चेतनभा
वः आज्ञानमाज्ञप्तिरीश्वरभावः विज्ञानं कलादिपरिज्ञानं प्रज्ञानं प्रज्ञप्तिः प्रागल्भ्यं मेधा ग्रंथधा

संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृति
र्मतिर्मनीषा जूतिः स्मृतिः संकल्पः ॥

रणसामर्थ्यं दृष्टिरिंद्रियद्वारा सर्व विषयोपलब्धिः धृतिर्धारणमवसन्नानां देहेंद्रियाणां
यथोत्तंभनं भवति धृत्या शरीरमुद्धरंतीति वदंति शारीरं मतिर्मननं मनीषा तत्र स्वातंत्र्यं जूतिस्त
ज्जसो रुजादि दुःखित्वाभावः स्मृतिः स्मरणं संकल्पः शुक्लकृष्णादि भावेन संकल्पनं रूपादीनां ॥

35

नमितिसंबंधात्प्रतीतिः शास्त्रं आसनोवृत्तिभिः संबंधः दर्शयत्युपलब्धुरिति ॥ श्रीरामसमर्थनारायणाय नमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रतुरध्यवसायः असुः प्राणादिर्जीवनक्रियानिमित्ता वृत्तिः कामोऽसंनिहितविषयाकांक्षा तृष्णा॰ वशः स्त्रीव्यति
करायभिलाषः इत्येवमाद्योऽन्तःकरणवृत्तयः प्रज्ञप्तिरूपस्य प्रज्ञानरूपस्य ब्रह्मण उपाधिभूता
स्तदुपाधिजनित गुणनामधेयानि संज्ञानादीनि सर्वाण्येवैतानि प्रज्ञप्तिमात्रस्य प्रज्ञानस्य नामधेयानि भवेति

क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवंत्येष ब्रह्मैष इन्द्र एष प्रजापति ॥ ॥

॥ एते सर्वे देवाः

नस्वतः साक्षात्तथाचोक्तं प्राणानेव प्राणो नामभवतीत्यादि स एष प्रज्ञानरूप आत्मा ब्रह्मपरं सर्वशरीरस्थं प्राणप्र
ज्ञात्मान्तःकरणोपाधिष्वनुप्रविष्टो जलभेदगत सूर्यप्रतिबिंबवद्धैरण्यगर्भः प्राणः प्रज्ञात्मा एष एवेन्द्रगुणो देवा
नीवा एष प्रजापतिः प्रथमजः शरीरी यतो मुखादिनिर्भेदद्वारेणाग्न्यादयो लोकपाला जाताः स प्रजापतिरेष एवान्ये
प्येते त्यादयः सर्वे देवाः एष एव ॥ ॥ ७ ॥ ॥ ७ ॥ ॥श्रीरामगुरवेनमः॥ ३५॥

इमानि च सर्वशरीरोपादानभूतानि पंच पृथिव्यादीनि महाभूतानि अन्नादत्वलक्षणान्येतानि
किंचेमानि क्षुद्रेरल्पकैर्मिश्राणि क्षुद्राणि मिश्राणि इव शब्दोऽनर्थकः सर्पादीनि बीजानि कारणानि इतराणि

इमानि च पंच महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येता
नीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च
जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनः ॥

चेतराणि च द्वैराश्येन निर्दिश्यमानानि कानि तानीत्युच्यते अंडजानि पक्ष्यादीनि जारुजानि च जरायुजानि
मनुष्यादीनि स्वेदजानि च यूकादीनि उद्भिज्जानि च वृक्षादीनि॰ अश्वा गावः पुरुषा हस्तिनः ॥ ॥ ॥

३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंन्यच्चयत्किंचेदं प्राणिजातं किंतन् जंगमं यच्चलति पद्भ्यां गच्छति यच्चपतत्रि त्रि
आकाशेनपतनशीलं यच्चस्थावरमचलं सर्वं तदशेषतः प्रज्ञानेत्रं प्रज्ञप्तिः

यत्किंचेदं प्राणिजंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञा
नेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञाप्रतिष्ठा ॥ ॥

प्रज्ञाब्रह्मैवनीयतेऽनेनेतिनेत्रं प्रज्ञानेत्रं यस्यतदिदं प्रज्ञानेत्रं प्रज्ञाने ब्रह्मण्युत्प
त्तिस्थितिलयकालेषु प्रतिष्ठितं प्रज्ञानाश्रयमित्यर्थः। प्रज्ञानेत्रो लोकः पूर्ववत्प्र
ज्ञाचक्षुर्वा सर्वएवलोकं प्रज्ञाप्रतिष्ठा सर्वस्य जगतः॥ ॥ ॥ ३६॥

एतत्संज्ञानमित्यादिना तत्पदार्थं परिशोध्य एष ब्रह्मेत्यादिना तस्यैकत्वमभिधाय स्वं प्रति तस्य ब्रह्मभावमुपदिशति प्रज्ञानं ब्रह्मेति· ब्रह्मप
दार्थं च शोधयति· तदेतदिति· निष्कलं निष्क्रियमित्यादिश्रुतिसिद्धं दर्शयति· निरंजनमित्यादिना। निरंजनमित्यागंतुकदोषविनिर्मुक्तमित्यर्थः।
तस्मात्प्रज्ञानं ब्रह्म तदेतत्त्रयस्त्वमिति सर्वोपाधिविशेषं सन्निरंजनं निर्मलं निष्क्रियं शांतमेकमद्वयं ने
तिनेतीति सर्वविशेषापोहसंवेद्यं सर्वशब्दप्रत्ययागोचरं तदत्यंतप्रज्ञोपाधिसंबंधेन सर्वज्ञमीश्वरं
सर्वसाधारणाव्याकृतजगद्बीजप्रवर्तकं नियंत्रे तर्यामिसंज्ञं भवति· तदेवाव्याकृतजगद्बीजभू
लक्ष तबुद्ध्यात्माभिमानं हिरण्यगर्भसंज्ञं भवति· तदेवांतरंडोद्भूत [illegible] प्रथमशरीरोपाधिमद्विराट्प्रजा
पतिसंज्ञं भवति· तथाविशेषशरीरोपाधिष्वपि ब्रह्मादिस्तंबपर्यंतेषु तत्तन्नामरूपलाभो ब्रह्मणः। तदे
वैकं सर्वोपाधिभेदभिन्नं· सर्वैः प्राणिभिस्तार्किकैश्च सर्वप्रकारेण ज्ञायते विकल्प्यते चानेकधा· ए
तमेके वदंत्यग्निं मनुमन्ये प्रजापतिं इंद्रमेके परे प्राणमपरे ब्रह्मशाश्वतमित्याद्यास्मृतिः।
एकमेवाद्वितीयमिति श्रुतिसिद्धत्वं दर्शयति· एकमिति अथात आदेशो नेतिनेतीत्यादिश्रुतिसिद्धत्वं दर्शयति नेतीति
यतो वाचो निवर्तंते इत्यादिश्रुतिसिद्धत्वं दर्शयति· सर्वशब्देति· कथं तर्ह्यस्य ब्रह्मत्वं देवादिकं उपाधिसंबंधादिति चेत्केन
केनोपाधिनासंबंधात् किंरूपं प्रतिपद्यते तत्राह तदत्येतीति· (37)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नें

नचब्रह्मणः सर्वात्मकत्वे प्रत्यक्षादिविरोधः। दर्शनानंतरविरोधो वा- वस्तुत एकत्वेपि मायाद्युपाधि भेदाद्भेदस्यासुपपत्तिरित्याद्युन्नेयं। देवैकमिति- पूर्वपुटसंबंधी टिप्पणं॥ स एतेन प्रज्ञेनात्मनेति विद्याफलं मुक्तिरिरुच्यते तस्यार्थमाह। स वामदेव इति॥

सवामदेवोऽन्यो वा यथोक्तं ब्रह्मवेद प्रज्ञेनात्मना येनैव प्रज्ञात्मना पूर्वे विद्वांसोऽमृता अभूवन् तथायमपि विद्वानेतेनैव प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्येत्यादि व्याख्यातं अस्माल्लोकादुत्क्रम्या

स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे
लोके सर्वान्कामानाप्त्वामृतः सम भवत्समभवत्॥५॥

मुष्मिन्स्वर्गेलोके सर्वान्कामानाप्त्वामृतः समभवत्समभवदित्योमिति॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविंदभगवत्पूज्यपादशिष्य श्रीशंकरभगवतः कृतौ बह्वृचब्राह्मणोपनिषद्भाष्य समाप्तं॥ श्रीरामचंद्रार्पणमस्तु॥ ॐ तत्सद्ब्रह्मार्पणमस्तु॥ ॥ ॥२७

स्त्रे

टिप्पण॥ वाङ्मे मनसीति खंडो भाष्यकारैर्न व्याख्यातस्तत्र कारणं न विद्मः सर्वैः पठितत्वात् प्रक्षेप इति तावद्वक्तुं न शक्यते वेदस्य म आणीस्थ इत्यादेरस्पष्टार्थादिसपि वक्तुं न शक्यते- तस्मादुपेक्ष्यतेऽस्माभिरियमुपेक्षा सर्वैः पनि
श्रोतुं ज्ञातुं समापयितुं वा शक्यादुर्विज्ञेयार्थत्वेनान्यथाज्ञानादिनिमित्त प्रतिबंधप्राचुर्यादिति- ज्ञापयितुमिति- दृश्यते

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठित
माविरावीर्मएधि वेदस्य म आणी स्थः॥ ॥

च प्रतिबंधस्तथा वाङ्मनसयोरत्यंत प्रतिष्ठारूपैकवाक्यत्वं प्रार्थनयातद्विपरीतरूपप्रतिबंधः सद्भावमितिमात्यर्थं प्रकटो भवेदिति ब्रह्मविषय प्रार्थनया च तत्र प्रतिबंधं दर्शयति- तथा मेऽज्ञानस्य स्थितिहेतुभूतौ शक्यौ भवत इति च॥ ॥ ॥ (३४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानस्योऽस्यापि ब्रह्मविषयत्वमशक्यमिति दर्शयति· तथा च श्रुतं ज्ञानं मम मा परित्यज्यताद्विस्मरणं मा
भूदिति तथा तेनाधीतेन ग्रंथज्ञानरूपेण वस्तुनाऽहोरात्राणि धारयामि अन्यत्सर्वं परिहृत्य ह्येतन्निष्ठो भवामि
तथा ऋतादिकमेव वदिष्यामि ऋतादिरूपं ब्रह्म परमपरं वा तन्मां वक्तारं च रक्षतु इति प्रतिबंधनिवृत्तिप्रा

श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं
वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु
मामवतु वक्तारमवतु वक्तारं ॥ ५ ॥ इति आत्मषट्कं समाप्तं ॥

र्थेनेनाप्येतमेव सूचयति· तस्मादयमेव भाष्यकारस्याभिप्रायः तस्मादस्मंत मूढा वयमिति न तद्विषये कि ॥२८॥
चिद्विघ्नः ॥ अहमेव परं ब्रह्म ब्रह्मैवाहं न संशयः ॥ संसारो मे तमोरूपो नासीन्नास्ति न भविष्यति ॥ ॥

इति श्रीमदुत्तमामृतपूज्यपादशिष्यस्य ज्ञानामृतयतेः कृतौ ऐतरेयोपनिषद्भाष्यटिप्पणे द्वितीयार
ण्यकं समाप्तं ॥ ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ ॥ ॥

स्वस्ति श्रीमन्नृपशालिवाहनशके १६ युवानाम संवत्सरे भाद्रपद कृष्ण त्रयोदश्यां पंचवटिका
यां श्रीरघुनाथचरणसरोजे सिंहस्थे गुरौ स्थिते ग्रंथं लिखितं समाप्तं ॥ श्रीरामचंद्रार्पणमस्तु ॥ ॥
श्रीसांबाय नमः ॥ यथोक्ततत्त्वविद्याप्रतिपादकग्रंथपाठेऽप्रमत्तमस्तादायावाकुसंस्कारान् मनसि प्रतिष्ठितान् मनसा यद्यद्ब्रह्मज्ञातं विवक्षितं तदेव पठतु मनश्च मे
दीर्घं वा चिरप्रतिष्ठितं यद्यद्विद्याप्रतिपादकत्वेन वक्तव्यं शब्दजातं मयि स्थितं तदेव मनसा विवक्ष्यते ॥ एवमन्योन्यानुगृहीते वाङ्मनसी विद्यार्थग्रंथसाकल्येनाव
धारयितुं शक्नुतः मनसः सावधानत्वाभावे वागिंद्रियस्खलनाद्भ्रमप्रमादप्रलापादिव्याप्तिः चिरसंगतं श्रुत्यानुवाचः पाठवासावेस्खलितं दृढस्यपावा
चाविवक्षितं सर्वं यथावन्नोच्चार्यते अतस्तयोरन्योन्यानुकूल्यमस्त्विति संप्रार्थ्यते ॥ आविः शब्देन स्वप्रकाशं ब्रह्म चैतन्यमुच्यते ॥ प्रज्ञानशब्देन व्यवहृत
त्वात्तस्याविर्भूतस्वरूपत्वं तथाविधं हे आत्मन्नेमदर्थमाविरेधि अविद्यावरणापनयनेन [illegible] एवं हे वाङ्मनसे मदर्थं वेदस्य यथार्थतत्त्वविद्याप्रति
पादकस्य ग्रंथस्य आणीस्थ आनयनसमर्थे भवेतां मे श्रुतं मया श्रोत्रेणावगतं ग्रंथं तदर्थजातं मा प्रहासीः मा परित्यजतु विस्मृतं मा भूदित्यर्थः ॥ अनेनाधीते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नग्रंथेन विस्मरणरहितेनाहोरात्रालीं दधामि संयोजयामि अहनि रात्रौ चाऽलस्यं परित्यज्य निरंतरं पठामीत्यर्थः ॥ अस्मिन्पठिते ग्रंथे ऋतं परमार्थभूतं वस्तु व
दिष्यामि विपरीतार्थवदनं कदाचिदपि मा भूदित्यर्थः ॥ ऋतं मानसं वाचिकमधिकं मनसा वस्तुतत्वं विचार्य काले शिष्याचार्ययोः पाठयामीत्यर्थः ॥ तन्मया
वक्ष्यमाणं ब्रह्मतत्वं मां शिष्यमवतु सम्यक् बोधनेन पाळयतु तथा तत्ब्रह्मतत्वं वक्तारमाचार्यमवतु ॥ बोधकत्वसामर्थ्यप्रदानेन पाळयतु पुनरप्य
वतु मामित्यावृत्तिः फलविषयापूर्णं साधनकाले शिष्याचार्ययोः पालनं प्रार्थितं इदानीं फलकाले प्रार्थ्यते शिष्यस्याविद्याकार्यनिवृत्तिः फलं आचा
र्यस्य तु नादृशशिष्यदर्शनेन विद्यासंप्रदायप्रवृत्तिरूपफलपरितोषः फलं अनेन मंत्रपाठेन ये विद्यासंतते पुरा विद्याप्रतिबंधका विघ्नाः प्रादुर्भूतं
ते वियोगस्तेनस्तेलतरमसंभावनाविपरीतभावनोत्पादका विघ्नाः परिहृतं यं ते अवतु वक्तारमित्यस्याभ्यासोऽध्यायसमाप्त्यर्थः ॥ ॥ द्वितीयारण्यकस
माप्त्यर्थश्च ॥ ॥ इति द्वितीयारण्यके शांतिपाठस्य विवरणं ॥ ॥ श्रीस्वामिने नमः ॥ ॥ श्री ॥ ॥

३१

K K S U LIBRARY
RAMTEK
441 106
M 1055
Dist. Nagpur

९०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 13:11
,TRANSFERRED=2020/10/23 at 13:16:20
,PAGES=40
,TYPE=STD
,NAME=S0004472
,Book Name=M-1055-ETREY PNISHDHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection